अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

त्रयोविंशे वर्षे तृतीयोऽङ्कः

१५ जुलाई, २००१

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः
सांख्ययोगाचार्यः

सहसम्पादकः

अभिनव शुक्लः, एम०ए०

देववाणी-परिषद्, दिल्ली

६, वाणी—विहारः, नयी दिल्ली—११००५९

(भारतम्)

अर्वाचीनसंस्कृतम् (२३/३)

१५ अगस्त, २००१ ई०

विषयसूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्	डा० रमाकान्त शुक्लः	१
२. दुर्जनैर्मित्रता कीदृशी	डा० इच्छाराम द्विवेदी 'प्रणवः'	२
३. भारतपाक-शिखर-संवादः	प्रा० हरिश्चन्द्र रेणापुरकरः	३-८
४. राष्ट्रभक्तः पं० मालवीयो विजयतेतराम्	डॉ० शिवकुमार मिश्रः	९-१०
५. उज्जयिनी विमला	डॉ० विन्ध्येश्वरीप्रसादमिश्रः 'विनयः'	११-१२
६. कविता	डा० बलवीरदत्त शास्त्री	१३-१४
७. तुदन्ति मामलम् !	मिश्रोऽभिराजराजेन्द्रः	१५
८. न चन्दनं वने-वने	मिश्रोऽभिराजराजेन्द्रः	१६
९. एकविंशीं प्रविष्टाः शताब्दीं वयम्	परमानन्द झा	१७
१०. मित्रतां कामये शात्रवं चाश्रये !	डा० रमाकान्त शुक्लः	१८
११. प्रकाशकिरणावली	प्रकाशचन्द्रो मिश्रः	१९-३३
१२. अवस्थिनो बच्चूलालस्य प्रतानिनी	डॉ० धर्मेन्द्रकुमारसिंहदेवः	३४-४५
१३. विंशशताब्दीये संस्कृतकाव्ये प्रतिबिम्बितं भारतम्	डा० रमाकान्त शुक्लः	४६-५२
१४. देववाणी-परिषद्वार्ता	अभिनवः शुक्लः	५३
१५. संस्कृत-जगद्वार्ता	अभिनवः शुक्लः	५४-५५

अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली । डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

१५-८-२००१ ई०

—रमाकान्तशुक्लः (प्रकाशकः, सम्पादकः)

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य त्रयोविंशवर्षीयस्तृतीयोऽङ्कः १५.७.२००१ तारिकायां प्रकाशनीय आसीत्। १४.७.२००१ तः १६.७.२००१ यावत् आगरानगरे 'भारतपाक-शिखरवार्ता' समायोजितासीत्। १४.७.२००१ तारिकायां पाकाधिपतेर्मुशर्रफस्य दिल्ल्यामवतरणमभूत् १६.७.२००१ तारिकायां च निशीथे विना कमपि निर्णयं वार्तावैफल्ये सः स्वदेशं प्रस्थितः। २०.७.२००१ तारिकायां तेन इस्लामाबादे 'प्रेससम्मेलनं कृतम्। भारतीयपक्षतः विदेशमन्त्रिणा श्रीजसवंतसिंहेन १७.७.२००१ तारिकायां प्रेससम्मेलनं कृतम्।अहमनुमिनोमि स्म यत्संस्कृतकवयोऽवश्यमेनां घटनामवलम्ब्य किञ्चिद्विरचयिष्यन्ति। अतोऽङ्कस्य प्रकाशनं विलम्बितम्। प्रा० हरिश्चन्द्र रेणापुरकरस्य एका रचना शिखरसंवादमवलम्ब्य मया प्राप्ता। इयं रचना ३१.७.२००१ तारिकायां सम्पूर्णा। डा० इंच्छारामद्विवेदिनोऽप्येका रचना लब्धा। पर्वतखननानन्तरं मृतमूषिकोपलब्धिन्यायेन किमेतया शिखरवार्तया लब्धमिति तु देशनायका एव जानीयुः किन्तु समग्रस्य राष्ट्रस्य दूरदर्शनावलोकनकाले परिणामं कमप्यलब्ध्वा रक्तचापस्तु वृद्धिं गत एव। **'शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः'** इतीयमुक्तिर्न जाने किमिति विस्मर्यते। दिष्ट्याद्य प्रधानमन्त्रिणा 'लालकिला' सम्बोधने जम्मूकश्मीरे आतंकवादमुन्मूलयितुं कठोरोपायानामवलम्बनमुद्घोषितम् येनाश्वस्तिं लभते नो चेतः।

संस्कृतसाहित्ये समकालीना घटना बहोः कालात् प्रतिबिम्बिता भवन्ति। **'विंशशताब्दीये संस्कृतकाव्ये प्रतिबिम्बितं भारतम्'**इति विषयमवलम्ब्य एतत्पंक्तिलेखकेन ७.४.२००१ तारिकायामेकं शोधपत्रं विश्वसंस्कृतसम्मेलने प्रस्तुतमासीत् यत्र स्थानानुरोधात् संक्षेपत एव काश्चन सूचनाः प्रदत्ता आसन्। स लेखोऽप्यत्र दीयते। एतदतिरिक्तं तरुणकवेः श्रीपरमानन्दझामहाभागस्य अर्वाचीनसंस्कृते प्रथमप्रविष्टिरूपेण **'एकविंशीं प्रविष्टाः शताब्दीं वयम्'** इतीयं रचना प्रकाश्यते यत्र स्रग्विण्या साम्प्रतिक्यः काश्चनोपलब्धयः प्रकीर्त्यन्ते। अन्या अपि गद्यपद्यमय्यो रचना अवलोकनीयाः सन्ति। डा० बलवीरदत्तशास्त्रि-डा० शिवकुमारमिश्र-डा० धर्मेन्द्रकुमारसिंहदेवेभ्यः प्रथमप्रविष्ट्यर्थं स्वागतं व्याहरामि। श्री प्रकाशचन्द्रमिश्रप्रणीताः श्लोका, **'प्रकाश-किरणावली'**तिशीर्षकान्तर्गतं दीयन्ते। इतः पूर्वमपि मिश्रमहोदयस्य रचनास्माभिरास्वादिताः सन्तीति नापोहितं विदुषाम्।

अग्रिमेऽङ्के प्रकाशनाय पुष्कला सामग्री अस्मत्पार्श्वे विद्यते। कृपया लेखकमहानुभावाः चतुर्विंशवर्षीयायाङ्काय रचनाः दिसम्बरमासे प्रेषयन्तु।

स्वातन्त्र्यपर्वणि भवद्भ्यः शुभाः कामनाः समर्प्यन्ते।

'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९
१५.८.२००१

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

दुर्जनैर्मित्रता कीदृशी

–डॉ० इच्छाराम द्विवेदी
रीडरः, पुराणेतिहासविभागः,
लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्,
नयी दिल्ली–११००१६

हिंसया दूषितैः, दुष्टताभूषितैः हे सखे ! दुर्जनैः मित्रता कीदृशी ?
लोकतन्त्रव्यथावर्द्धकैः शत्रुभिः स्वार्थलिप्तैः सखे ! बन्धुता कीदृशी ?

दुग्धदानं कृतं कृष्णसर्पाय रे ! यत्त्वया तेन किं साधितं हे सखे!
स्वागतं यच्छृगालस्य सिंहैः कृतं भारतं गौरवं बाधितं रे सखे!
सत्समाजो भुजङ्गैः सदा पीड्यते दर्शिता तैः कदा साधुता कीदृशी?

''ताजसंज्ञे'' महच्छुभ्रसौधे त्वया यामुने क्षेत्रके स्वागतं यत्कृतम्
कालियेनात्र गर्वोद्धतेन स्वयं निष्फलं मित्र-वार्ता-विधानं कृतम्
तत्फणाली द्रुतं चूर्णनीया सखे उद्धतानां कृते सान्त्वना कीदृशी ?

वञ्चकं बन्धुतारागसंलापकं छद्मयुद्धे रतं शत्रुतापादकम्
दण्डनीतिप्रहारैः कुरु त्वं भृशं जर्जरं शक्तिहीनञ्च तन्नास्तु शम्
तत्प्रणाशाय यत्नो विधेयः सखे ! दुर्मुखानान्तु सम्भावना कीदृशी ?

पूर्वजैः शान्तये गेहभागः कृतः दुर्जनैः तत्कदापीह न स्वीकृतः
शान्तिपाठः सदा भारतै पाठितः किन्तु तैः सर्वदा द्वेषमार्गो वृतः
तच्छठे शाठ्यमेवाद्य शिक्ष्यं त्वया दुष्टताराधकेभ्यः क्षमा कीदृशी ?

नैकवारं जितो दण्डितोऽसौ शठः शान्तिसंवर्धनं काम्यते तेन नो
दण्डनीयो बलैः साम्प्रतं तादृशः उद्धतोऽसौ भवे मित्र जीवेत नो
हिंसकानां खलानां वृकानां कृते शान्तिगीतामयी प्रार्थना कीदृशी ?

भारतपाक-शिखर-संवादः

–प्रा० हरिश्चन्द्ररेणापुरकरः
जेवरगीनिवासः हॉटेल परिवारस्य पृष्ठतः
स्टेशन मार्गः, गुलबर्गा-५८५१०२ (कर्णाटकः)

अस्मद्राष्ट्रमहाप्रधानसचिवः श्रीबाजपेयी सुधीः
पाकैर्भारतराष्ट्रघोररिपुभिः सौहार्दसख्येच्छुकः ।
पाकाध्यक्षमुशर्रफं भरतभूयात्रार्थमामन्त्रयत्
संवादं खलु यत्र तेन सहितं कर्तुं चिराकाङ्क्षितम् ॥१॥

अन्ते भारतपाकनेतृवरयोर्मध्ये चिरोत्प्रेक्षितः
संवादस्त्रिदिनात्मकः समभवच्चाग्रामहापत्तने ।
कश्मीरेण समं समस्तविषया यत्राभवंश्चर्चिताः
किन्त्वप्रत्ययशीलपाकचरिताच्छङ्कास्पदं तत्फलम् ॥२॥

लाहोरे ननु बाजपेयिसहितं सन्धिं शरीरफो व्यधात्
कार्गीले तु मुशर्रफेण विहितं सीमासमुल्लङ्घनम् ।
मायाछद्मपरं तमेव विषये प्रेम्णा समामन्त्र्य वै
घोरं साहसमेव नूनमकरोच्छ्रीबाजपेयी सुधीः ॥३॥

पूर्वैतिह्यभराद्धि भाविसमयं मुक्तं विधातुं ध्रुवं
सौहार्देन नितान्तमुक्तमनसा गच्छाम्यहं भारतम् ।
कश्मीरेण समं समस्तविषयानालोचयिष्याम्यह-
मित्युक्त्वैव कलत्रमन्त्रिसहितं सम्प्रस्थितो भारतम् ॥४॥

दिल्ल्यां तस्य सहर्षभावभरितं राजोचितं स्वागतं
सर्वैर्मन्त्रिगणैश्च राष्ट्रपतिभिर्दृष्ट्वा कृतं दम्पती ।
सन्तुष्टौ च मुशर्रफावतितरां जातौ परं हर्षितौ
विश्वाश्चर्यविशालताजमहलं द्रष्टुं च सायं गतौ॥५॥

भव्योदात्तविशालसुन्दरतमं चाश्चर्यकृद्भास्वरं
दाम्पत्यप्रणयप्रतीकमिव तन्मूर्तं स्थितं कौतुकम् ।
साक्षात्कृत्य मुशर्रफाख्ययुगलं जातं परं विस्मितं
नूनं तेन मुशर्रफस्य हृदयं ह्युत्फुल्लमेवाभवत् ॥६॥

नूनं तत्प्रतिबिम्बितं समभवत् श्वोभाविसम्भाषणे
संवादोऽपि बभूव तेन सुखदो नूनं सकारात्मकः ।
प्रत्याशाजननी बभूव नियतं संवादसंभावना
ह्यन्येद्युस्तु समस्तमेव सहसा व्यत्यस्तमेवाभवत् ॥७॥

स्वातिथ्यं विदधद्विशालविषयाकांक्षामनादृत्य वै
कश्मीरीयहुरीयताभिधजनानाहूय वार्ताकृते ।
पाकध्यक्षमुशर्रफेण सुतरामौचित्यभङ्गः कृतः
संवादाय तदेव नूनमभवत् सद्योऽन्तरायो महान् ॥८॥

प्रत्याख्याय विरोधमेव नितरामस्मन्महामन्त्रिण-
स्तानाहूय हुरीयतीयमुखरान् गुप्तं च सम्भाष्य तैः ।
तीव्रोग्रः प्रकटीकृतो भरतभूनीतिं प्रति व्यत्ययः
रोद्धव्यः समभूत्स नायकवरैरस्मान्महासाहसात् ॥९॥

उद्घुष्टं किल पत्रकारसदसि स्पष्टं च पाकाधिपैः
"कश्मीरं भवतीह मुख्यविषयो गौणा भवन्तीतरे ।
कश्मीरस्य समाधिवर्जमितरद् व्यर्थं समस्तं ध्रुवं
नित्यं यत्र जना म्रियन्ति शतशस्तं वर्जमन्येन किम्" ॥१०॥

कश्मीरं भवतीह भारतभुवो नूनं ह्यभिन्नाङ्गक-
मित्युक्ते च मुशर्रफेण कथितं यद् वादवस्त्वस्ति तत्।
घोरोग्रा अतिवादिनस्तु नियतं स्वाधीनतासैनिकाः
साह्यं नैव करोति पाकविषयस्तेषामिति प्रोक्तवान् ॥११॥

कश्मीरं भवतीह वादविषयो हीत्येव सोऽद्घोषयत्
संवादे ननु कश्मिरं विरहितं भागं ग्रहिष्यामि चेद् ।
दिल्ल्यामेव सदा मयाऽत्र नियतं स्थेयं भवेन्निश्चित-
मित्थं तेन हि कश्मिरस्य विषये वैवश्यमाविष्कृतम् ॥१२॥

कश्मीरेण समं समस्तविषये घोरोग्रवादाश्रयः
शस्त्रास्त्रैश्च धनेन पोषकवरः पाकोऽस्ति निश्चप्रचम् ।
इत्थं वेत्तितरां समस्तभुवनं किन्त्वत्र पाकाधिपो
मिथ्यैव प्रकटीकरोति कितवान् स्वातन्त्र्ययोधा इति ॥१३॥

सिम्लासन्धिसहैव तां सुविदितां लाहोरसंघोषणां
स्वीकुर्वे न करिष्यते च नहि तत् संघर्षसंरोधनम् ।
कश्मीरं च सदैव केन्द्रविषयः पाकाय नूनं भवे-
दित्युद्घोष्य मुशर्रफेण सततं वार्ता कृता निष्फला ॥१४॥

शाठ्यं तस्य मुशर्रफस्य सुधियाः! पश्यन्तु मायाविनः
शान्तिस्नेहसखित्वभावपिशुनां वार्तां करोत्येकतः ।
कश्मीरे सममेव निर्मलनिरीहोज्जासनं चान्यतः
चित्रं भारतनायकैर्न विहिता तद्धिक्कृतिस्तत्क्षणे ॥१५॥

पारेसीममपापघोरहननं यावन्न संरुध्यते
संवादो न कदापि पाकमुखरैस्तावद्भवेन्निश्चितम् ।
इत्येतत्समयं विहाय सहसा किं ते समामन्त्रिताः
वैवश्यं समभूत् किमत्र नियतं नो विद्महे तत्त्वतः ॥१६॥

स्वस्थानं तु मुशर्रफेण सुदृढं संभाषणात्साधितं
यद्यत्पाकजनाय संश्रुतमभूत्तत्तेन संपादितम् ।
अत्रामन्त्र्य मुशर्रफस्य महिमा व्यर्थं च संवर्धितो
वर्चस्वं खलु भारतोपरि महत्तेनात्र सिद्धीकृतम् ॥१७॥

लोकादेशविहीनशासकजनं नूनं स्वयं घोषितं
कार्गीले खलनायकं भरतभूविश्वासघातात्मकम् ।
अस्मद्राष्ट्रमहाप्रधानसचिवैर्मत्वा स्वयं कुण्ठितं
पाकाध्यक्षजनं निमन्त्र्य निकृतिर्नूनं समामन्त्रिता ॥१८॥

अस्मद्वीरभटैर्महोग्रकितवा भङ्गोन्मुखं प्रापिताः
सङ्घर्षोपरमाच्च भारतभुवो जाता रणायोद्यताः ।
संवादाय निमन्त्रणेन च पुनस्तद्धैर्यवृद्धिर्ह्यभू-
दस्मत्सैन्यमनोबलं तु नितरां क्षीणं ह्यभून्निश्चितम् ॥१९॥

हत्यास्फोटसमापराधदुरितान् कृत्वाऽपि पाके स्थितं
दावूदं च विमानहर्तृकितवान् प्रत्यर्पणायार्थितः ।
सर्वे ते न भवन्ति पाकविषये हीत्युक्तवान् सोऽनृतं
पाके भारतयुद्धबन्दिविषयेऽप्येवं स मिथ्याऽवदत् ॥२०॥

पाके तेन हि पत्रकारमिलने भूयः समुद्घोषितं
यत्कश्मीरमभूद् विवादविषयश्चाद्याप्यसौ विद्यते ।
यावत्तस्य समाधिरेव न भवेत्ताव शान्तिर्भवेत्
कश्मीरं व्यतिरिक्तमन्यविषयः क्षोदक्षमो नैव नः॥२१॥

कश्मीरीयमहोग्रवादविषयं सोऽवर्जयच्चर्चितुं
बाङ्ग्लादेशविमुक्तिवाहिनिसमं किं वा फिलिस्तीनवत्।
कश्मीरीयविमुक्तिसङ्गरवरं सोऽवर्णयद् भूरिशो
भेत्तुं स प्रतिभाति कश्मिरभुवं बद्धादरो भारतात् ॥२२॥

पाकाध्यक्षमुशर्रफस्य नितरां दुःसाध्यनिर्बन्धवद्-
दुर्दान्तोग्रदुराग्रहिप्रकृतितः सम्भाषणं निष्फलम् ।
अस्मन्मन्त्रिवरैस्तु दार्ढ्यमतुलं सन्दर्शितं निश्चलं
ह्यग्रेऽपि प्रखरोग्रवादशमने भाव्यं कठोरैर्दृढैः ॥२३॥

कश्मीरीयविवादसिद्धिरपि नो तद्वास्यनुज्ञां विना
हीत्युक्त्वैव हुरीयतैः सह कृता पाकाधिपैः सङ्कथा ।
हिन्दूपण्डितबौद्धसिक्खसुजनाः किं सन्ति नो कश्मिरे
संवादश्च मुशर्रफेण विहितः किं केवलैर्हुर्यतैः ॥२४॥

तैः संमन्त्र्य रहो हुरीयतजनै राष्ट्रप्रतिद्वन्द्विभिः
साह्यं सुश्रुतवान् समस्तमपि तांस्तेषां महासङ्गरे ।
तत्सर्वं यजमानराष्ट्रधरणौ स्थित्वेति घोराकृतिः
प्रष्टव्यः समभूत्स घोरकृतये धुर्यैर्महामानिभिः ॥२५॥

कश्मीरं नियमेन भारतभुवो जातं ह्यभिन्नाङ्ककं
पाकः शस्त्रबलैर्जिहीर्षुरकरोद् युद्धं चतुर्भारतैः ।
वैफल्ये तु करोत्यघुष्टसमरं प्रेष्योग्रघोरासुरान्
येनाणवस्त्ररणात्प्रकम्पितजगन्माध्यस्थ्यमेवाचरेत् ॥२६॥

ज्ञात्वाप्येतदखण्ड्यभीषणतमं पाकेप्सितं दारुणं
व्यर्थं भारतशासनेन घुषिता संघर्षशान्तिर्ध्रुवम् ।
तस्मात्साहसधैर्यमेव कितवानामत्र वृद्धिं गतं
संवादेन ततश्च निष्फलतया तत्तीव्रतां प्राप्नुयात् ।।२७।।

पाकाक्रान्तविशालकश्मिरभुवो भागोऽद्य पाकेन वै
त्यक्तव्यो भवतीति कश्मिरभुवो मुख्या समस्याऽधुना ।
संवादे तु विचारितैव नहि सा ह्याश्चर्यमेवास्ति तत्
तस्मादेव करालवादविषयः कश्मीरमद्यास्ति तत् ।।२८।।

पाकिस्तानदुराग्रहान्न समभूत्सम्भाषणे निर्णयः
यत्संयुक्तनिवेदनं न घुषितं तन्मूलमेवास्ति तत् ।
किं कार्यक्रमपत्रकं नहि कृतं प्रागेव संभाषणात्
तस्मादेव मुशर्रफेण निहिता वार्ता परं निष्फला ।।२९।।

वार्तावस्तुविनिश्चयोऽपि नियतं तेनैव चेद्वारितः
संवादोऽपि तदैव तेन सहितं संरोधनीयो ह्यभूत् ।
नूनं तेन मुशर्रफेण सकलं स्वेच्छानुसारं कृतं
वार्ताऽऽवश्यकतैव कुत्र समभूद् गत्यन्तराभाववत् ।।३०।।

कश्मीरं भवतीह भारतभुवो नूनं ह्यभिन्नाङ्गक-
माक्रम्याकलितस्तदीयशकलः पाकेन हेयः स्वयम् ।
पाकप्रेरितभीषणोग्रहननं रोद्धव्यमेवाचिरं
नोचेन्नैव कदापि भाविनि भवेद् वार्तेति घोष्यं दृढम् ।।३१।।

पाकिस्तानमहादुराग्रहवशात् सम्भाषणं निष्फलं
त्रैलोक्ये तु मुशर्रफेण विहितं दोषास्पदं भारतम् ।
तस्याडम्बरपूर्णभव्यविपुलं राजोचितं स्वागतं
कृत्वा किं खलु साधितं गुरुतरं नैराश्यवर्जं ध्रुवम् ।।३२।।

संवादो विफलस्तथापि विधिवत् पाकैश्चिकीर्षुः पुनः
पाकं यास्यति बाजपेयिधृतिमान् पाकाधिपामन्त्रणात् ।
हत्यासत्रमतीव भीषणतमं सञ्चालयद्दुर्जनैः
संवादस्तु कथं दुराग्रहहिशठैः शक्योऽस्ति नो विद्महे ।।३३।।

तथ्यं घोररणैः प्रमाणितचरं बोध्यं महामन्त्रिमि-
र्यत्कश्मीरमभीप्सुपाकविषयः शाम्येन्न युद्धं विना ।
तस्मान्नैव विनाश्य वित्तसमयौ सम्भाषणे व्यर्थके
क्रूरान् घोरतमोग्रवादिकितवान् पाठ्योऽद्य पाठो महान्॥३४॥

पाकस्यैव महादुराग्रहवशाद् वार्ता कथं निष्फला
सञ्जातेति निबोध्य विश्वमखिलं सञ्चालनीयं ध्रुवम् ।
घोरोग्रं ह्यभियानमेव नियतं प्रत्युग्रवादं ततः
पाकक्रूरतमोग्रवादिशिबिराण्याक्रम्य नाश्यानि वै ॥३५॥

अस्मत्सौहृदशान्तिभावसहितं पाकोग्रवादं प्रति
निःशङ्कं च महोग्रवादविपदः सन्त्रस्तभीतं जगत् ।
अस्मत्तत्प्रतिघातिदारुणकृतिं सन्धारयेन्निश्चितं
लोके सज्जनरक्षणं च दलनं धर्मो महान् दुष्कृताम् ॥३६॥

⌘⌘⌘

राष्ट्रभक्तः पं० मालवीयो विजयतेतराम्

–डॉ० शिवकुमार मिश्रः
संस्कृतविभागस्थः, कुँवरसिंहमहाविद्यालये,
लहेरियासरायः (बिहारः)-८४६००३

मालवीयो महाभागः विद्वानादर्शचिन्तकः ।
भारतस्य समुद्धर्त्ता सदा विजयतेतराम् ॥१॥

मदनमोहनोपाह्वः त्यागभावसमन्वितः ।
प्रयागसंज्ञके स्थाने भक्तोऽयं समजायत ॥२॥

वेदवागाष्टचन्द्राब्दे संस्कृतस्य प्रचारकः ।
कुशाग्रबुद्धिसम्पन्नः स्नातकोपाधिमण्डितः ॥३॥

ततोऽध्यापनकार्ये सः नियुक्तिं प्राप्य सर्वथा ।
सत्वरं राष्ट्रभक्तोऽयं प्राध्यापनं परित्यजत् ॥४॥

ततः परं महानेता न्यायोपाधिमण्डितः ।
न्यायकार्ये नियुक्तोऽपि संतोषं नैव प्राप्तवान् ॥५॥

स्वकीयजीवनस्यैवं सर्वस्वं वै समर्पितम् ।
सर्वथा राष्ट्रभक्तेन राष्ट्रकल्याणवाञ्छया ॥६॥

रसनागाष्टचन्द्राब्दे राष्ट्रस्वातन्त्र्यकाम्यया ।
चिन्तनधनिना तेन कांग्रेसः समलङ्कृतः ॥७॥

रागद्वेषवियुक्तोऽयं द्विवारमभवत्किल ।
सर्वथा सर्वसम्मत्या कांग्रेसस्य सभापतिः ॥८॥

नायकस्यास्य नेतृत्वेऽधिवेशने प्रयत्नतः ।
सञ्चालनं कृतं भव्यं कांग्रेसस्य सर्वथा ॥९॥

राष्ट्रवादी महात्यागी त्रिवारमभवत्खलु ।
हिन्दूमहासभायाश्च निर्विरोधः सभापतिः ॥१०॥

एवमेव महाभागः राष्ट्रभक्तो महामना ।
कल्याणार्थं हि राष्ट्रस्य संघर्षे निरतोऽभवत् ॥११॥

पाश्चात्त्यशिक्षया साकं राष्ट्रियशिक्षणस्य वै ।
पण्डितोऽयं महाभागः व्यवस्थां कृतवान्ध्रुवम् ॥१२॥

विद्यानुरागिणा तेन काश्यां पुण्यस्थले किल ।
विश्वविद्यालयः एकः संस्थापितः प्रयत्नतः ॥१३॥

शीघ्रमेव हि संस्थेयं विश्वनाथप्रसादतः ।
बी०एच्०यू०संज्ञिका नूनं सञ्जाता विश्वकीर्तिता ॥१४॥

शिक्षाकेन्द्रमिदं नूनं सम्प्रत्यपि निसर्गतः ।
कीर्तिर्या मालवीयस्य वितनोति निरन्तरम् ॥१५॥

पक्षवेदाङ्कचन्द्राब्दे विश्वविद्यालयस्य वै ।
साफल्यार्थं समाहूता जयन्ती राष्ट्रवादिना ॥१६॥

विश्वविद्यालयस्यास्य गान्धिवर्यो महोदयः ।
रजतात्मकवर्षेऽस्मिन् मुख्यातिथ्यं चकार सः ॥१७॥

राष्ट्रभक्तेषु सर्वेषु स्थानमस्य सुरक्षितम् ।
अर्थप्राप्तिं परित्यज्य राष्ट्रसेवां चकार सः ॥१८॥

राष्ट्रवादी महात्यागी पण्डितोदारकीर्तितः ।
सर्वसम्मतनेतृत्वे स्मरणार्होऽस्ति सर्वथा ॥१९॥

भाषणे पाटवं यस्य कर्मणि कौशलं तथा ।
समाजे सर्वमान्योऽयं भारते भातु सर्वदा ॥२०॥

संस्कृतस्य समुद्धर्ता राष्ट्रवादसमर्थकः ।
संस्कृतेश्च परो भक्तः स्मर्तव्यो राष्ट्रवादिभिः ॥२१॥

◆◆◆◆

उज्जयिनी विमला

—डॉ० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः'
एफ २/२२, शिक्षक आवासः, वि०वि० परिसरः, कोठी, उज्जैन-४५६०१०

भारतभूमिहृदयमणिमाला,
प्रतिकल्पावन्तिका विशाला
सच्चिच्चन्द्रकला,
उज्जयिनी विमला ॥१॥

सिप्रासंवलिताऽवनिललिता
सुरभितपवनोपवनैर्वलिता
सञ्चितपुण्यजला,
उज्जयिनी विमला ॥२॥

खगकुलमुखरमनोहरवदना
सुन्दरतासम्भृतसुखसदना
स्फुटसहस्त्रकमला,
उज्जयिनी विमला ॥३॥

'महाकाल'-निलया मधुवलया
त्रिभुवनमुपकुरुते निजकलया
भावमयी सरला,
उज्जयिनी विमला ॥४॥

'मङ्गलनाथ-सिद्धवट'-सहिता,
'सान्दीपनि'-पुण्याश्रममहिता
भूषितदिगञ्चला,
उज्जयिनी विमला ॥५॥

'गढ़कालिका'-समर्चननिरता
'चिन्तामणि''हरसिद्धि'-सङ्गता
'नगरकोट'धवला,
उज्जयिनी विमला ॥६॥

'श्रीमत्स्येन्द्र''भर्तृहरि'-वन्द्या
'पार्श्वनाथ'-'शकेब'-कृतिनन्द्या
भैरवतन्त्रबला,
उज्जयिनी विमला ॥७॥

धर्मसमन्वयसाधनसरणी
ताथागतार्हतादिकतरणी
शमितदुरितपटला
उज्जयिनी विमला ॥८॥

'कालिदास'-कविता कल्याणी
प्रणवनिनादितवैदिकवाणी
'विक्रम'-शौर्यफला,
उज्जयिनी विमला ॥९॥

'शकच्छत्रपा'क्रमणैः सुप्ता
परमारैर्गुप्तैरपि गुप्ता
बहुनृपनयशबला,
उज्जयिनी विमला ॥१०॥

नव्यैर्भव्यक्रमैर्निवीता
वेधयन्त्रशाला-संस्फीता
विद्युद्भाचपला,
उज्जयिनी विमला ॥११॥

'वेदप्रतिष्ठान'-सृतिसिद्धा
'कविकुलगुरुसंस्थान'-समृद्धा
प्रत्नाऽपि च नवला,
उज्जयिनी विमला ॥१२॥

विक्रमोपपदविश्वविताना
विद्याकेन्द्राञ्चितगुणगाना
नन्दितधरातला,
उज्जयिनी विमला ॥१३॥

विद्वद्वृन्दविभावितवचना
बहुशोऽनल्पशिल्पनवरचना
पथिकनयनतरला,
उज्जयिनी विमला ॥१४॥

कविता

—डा० बलबीर दत्त शास्त्री
साहित्यायुर्वेदाचार्यः, बी.आई.एम.एस.,
चिकित्सालयाध्यक्षः, गौड ब्राह्मण आयुर्वेदिक कालेजः,
ब्राह्मणवासः (रोहतक)

यस्याः पादरजःस्पर्शात्क्षीयन्ते किल्विषानि वै ।
विमला शेमुषी भूयात्तां वन्दे शारदाम्बिकाम् ॥१॥

हे हे मान्य महोदयाः कविगणाध्यक्षाः कवीनां वराः
मञ्चस्था अपि चान्यकाव्यरचनानैपुण्यभाजो नराः ।
गोष्ठी यात्र विराजते सुरुचिरा भावाभिभूता रसै-
रस्यां मे कविता भवत्श्रुतिपथाऽऽभूषाभवेच्छालिनी ॥२॥

कदाचारो दैन्यं निरशनमशिक्षापि हननं
विलोक्यन्ते देशे श्रुतिनयनपान्था अधिकशः ।
विनोत्कोचं कार्याण्यखिलजनताया न सुशका-
न्यहो कीदृक्कालः प्रसरति प्रभो ते कलियुगे ॥३॥

रविविधू धरणीग्रहतारका
जगति याकृतिरस्ति तवैव सा ।
त्वमसि चेतसि मेऽन्तरधिष्ठितो
मम नमस्कृतिरस्ति गृहाण ताम् ॥४॥

नमामीशं सदा वन्दे त्वदीयं कीर्तनं कुर्वे ।
त्वयैषा संसृतिः सृष्टा तदर्थं तेऽर्चनां कुर्वे ॥५॥

बहिः साधुः पशुश्चान्तो धरण्यां दृश्यते नाऽयम् ।
परन्त्वेतादृशं दुष्टं कथं त्वं लोकसे मातः ॥६॥

बलात्कारा भवन्त्यत्र कदाचाराः क्वचिद्भूरि ।
विलुण्ठाका दिनार्धेऽपि प्रजा लुण्ठन्ति निर्भीकाः ॥७॥

त्वयाऽयं प्रेषितो लोके परेषां दुःखनाशार्थम् ।
करोत्यन्यायमार्गेण मनुष्योऽन्यान्सुखैर्हीनान् ॥८॥

सदाचारेण हीनोऽयं दुराचारेण संयुक्तः ।
निहन्ति स्वीयविस्फोटैरमूल्याञ्जीवितान्दुष्टः ॥९॥

कथं स्यादस्य निस्तारः प्रवृत्तिर्यस्य दुष्कृत्ये ।
प्रभो ! सद्बुद्धिदानेन निरोधो दुष्पथात्कार्यः ॥१०॥

त्यजन्ति प्रेयसो मार्गं व्रजन्ति श्रेयसोऽध्वानम् ।
त एवाधिश्रियन्तेऽत्र विभो सायुज्यभावं ते ॥११॥

मदीयेयं सदा वाञ्छा त्वदीयां प्राप्नुयां भक्तिम् ।
कृपां मे धेहि तादृक्षीं यया त्वां विस्मरेयं न ॥१२॥

रुजार्तो मां समागच्छेदवाप्योल्लाघतां यायात् ।
भवेयं व्याधिहर्ताहं समेषां स्नेहपात्रञ्च ॥१३॥

मदीयं देहमेतत्तु विनश्येत्कर्हिचित्क्वापि ।
अतोऽनेनान्यलाभः स्याद्वरं मे क्षेमकृत्तत्तु ॥१४॥

त्वमेवामुष्य कायस्य नियन्ता चेश्वरो भूमा ।
कराब्जे तेऽर्प्यते तस्मात्प्रसन्नीभूय गृह्णातु ॥१५॥

व्रजन्तं नाथ लोकेऽस्मिन्प्रमोहे पाहि मग्नं माम् ।
दयाया भाजनं तेऽहं तया संयोजयैनं माम् ॥१६॥

न कश्चिन्मे शृणोत्यत्र न पश्यत्याशु दीनं माम् ।
अतो याचे भवाम्भोधौ निमग्नं पाहि दीनं माम् ॥१७॥

अनैकैः कायरोगैर्मे शरीरं पीडितं स्वामिन् ।
भवान्भैषज्यविच्छ्रेष्ठो निरोगं धेहि दुःखैर्माम् ॥१८॥

गीर्वाणवाणी विदुषामस्मिन्संस्कृतमेलने ।
ददामि बहुशो धन्यवादानायोजकाय वै ॥१९॥

(इयं कविता कविना १२.४.१९९८ तम तारिकायां 'गुरुकुल महाविद्यालय, ज्वालापुर, हरिद्वार-२४९४०५' इत्यनया संस्थया समायोजिते संस्कृतकविसम्मेलने पठितासीत्।)

तुदन्ति मामलम् !

–मिश्रोऽभिराजराजेन्द्रः
हिमाचलप्रदेशविश्वविद्यालये संस्कृतविभागाचार्यः
११४, टीचर्स होस्टल, समर हिल, शिमला–१७१००५

ह्यो यदीयपादकण्टकाः समुद्धृता मया ।
कण्टकीभवन्त एव ते तुदन्ति मामलमम् ॥१॥

यद्गृहं निवारितं प्रदीप्तवह्नितो मया ।
पावकीभवन्त एव ते दहन्ति मामलम् ॥२॥

स्वाशिषा प्रवर्धिताः प्रसह्य ये मया सदा ।
तापसीभवन्त एव ते शपन्ति मामलम्॥३॥

येऽप्यसीमशंसया मया तुरङ्गमीकृताः ।
रासभीभवन्त एव ते धुवन्ति मामलम् ॥४॥

यल्ललाटलेखपुष्पिका मयैव कल्पिताः ।
नायकीभवन्त एव ते दिशन्ति मामलम् ॥५॥

लेखनानि यत्कृतानि शोधितान्यहो मया ।
कोविदीभवन्त एव ते हसन्ति मामलम् ॥६॥

ये प्रचण्डकम्पनेऽपि सुस्थिरा मया कृताः ।
क्षेपकीभवन्त एव ते क्षिपन्ति मामलम् ॥७॥

कीदृशस्समागतोऽधुना विपर्ययो युगे ।
ये सुहृत्तमास्त एव वञ्चयन्ति मामलम् ॥८॥

❖❖❖

न चन्दनं वने-वने

–मिश्रोऽभिराजराजेन्द्रः
हिमाचलप्रदेशविश्वविद्यालये संस्कृतविभागाचार्यः
११४, टीचर्स होस्टल, समर हिल, शिमला–१७१००५

सत्यमेव दृश्यते सुभाषिते पुरातने।
नो मणिर्गिरौ-गिरौ, न चन्दनं वने-वने ॥१॥

वारिणा समं प्रयाति दुग्धमेकरूपताम्
किन्तु तैलमिश्रितं तदेव नैति मित्रताम्
सौहृदं विकस्वरं न जीवति प्रवञ्चने
नो मणिर्गिरौ-गिरौ, न चन्दनं वने-वने ॥२॥

धर्म एव रक्षति स्वयं स चेत्सुरक्षितः
जायते विसारिणी विभा प्रदीपकुक्षितः
अञ्जनं क्व सम्भवेन्महेश्वरे निरञ्जने ?
नो मणिर्गिरौ-गिरौ, न चन्दनं वने-वने ॥३॥

सत्यपालनेन वर्धते सदा मनोबलम्
जीवनञ्च जायते निरर्गलं निराकुलम्
मङ्गलं क्व कल्प्यते सति त्रिलोकरावणे ?
नो मणिर्गिरौ-गिरौ, न चन्दनं वने-वने ॥४॥

अत्ययानपाकरोति सात्त्विकी सहिष्णुता
वृद्धिमीयते तया ध्रुवं निसर्गजिष्णुता
आर्जवं महीयते न जातु रीतिलङ्घने
नो मणिर्गिरौ-गिरौ, न चन्दनं वने-वने ॥५॥

यन्महार्घमत्र दृश्यते तदात्मरक्षितम्
निर्गुणौषधं वनेषु केन कुत्र भक्षितम्
द्योतते क्षणप्रभाऽपि नैव सा घने-घने
नो मणिर्गिरौ-गिरौ, न चन्दनं वने-वने ॥६॥

○○○

एकविंशीं प्रविष्टाः शताब्दीं वयम्

—परमानन्द झा
डब्ल्यू जैड ४७, पोसंगीपुर,
जनकपुरी, नई दिल्ली-११००५८

सर्वदु:खस्य मूलं पराधीनता हीनता हार्दिकी नोऽद्य दूरं गता ।
सङ्गता स्वावलम्बोन्नता श्रीः स्वयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥१॥

भेदभावोऽद्य भीतः शनैर्भारते नाद्य बाल्ये विवाहः, सतीत्वं च ते ।
नाप्यशिक्षा तथा, नो मनः सामयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥२॥

नाद्य देशेऽस्मदीये स्त्रियो निर्बलाः क्वापि मीरासमाः पीतहालाहलाः ।
इन्दिरा मन्दिरेष्वद्य नो निर्भयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥३॥

उन्नता नः कृषिः साधनैरुन्नतैः अद्य वाणिज्यमस्माकमभ्युन्नतम् ।
सत्कणैः साधु कृत्वा श्रियः सञ्चयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥४॥

साङ्गणक्येऽद्य वा सूचनोद्योगके सर्वतो नो युवा श्रेष्ठ उद्घोष्यते ।
पोष्यते प्रीतिरस्मिन् लसद्विस्मयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥५॥

प्राप्य साऽमर्त्यसेनं तथाऽरुन्धतीं ज्ञानगङ्गा नवीभूय निःस्यन्दते ।
वन्द्यते नः पुनः सद्गृहं चिन्मयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥६॥

आणवीयैर्नवैरस्त्रशस्त्रोच्चयैः कोविदैः कल्पितैः कल्पनामज्जितैः ।
सज्जितं नोऽद्य सैन्यं सुलब्धोदयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥७॥

विश्वनाथन्-सचिन्-पेस-मल्लेश्वरी-गोपिचन्दादिभिः क्रीडकैश्चर्चितैः ।
अर्चितं नोऽद्य भूरत्नमाभामयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥८॥

एवमासाद्य भूयः समभ्युन्नतिं सर्वतश्चापि संयम्य शत्रूद्गतिम् ।
सख्यभावाद्, अभीत्या, विधूय स्मयम् एकविंशीं प्रविष्टाः शताब्दीं वयम् ॥९॥

❖❖❖

मित्रतां कामये शात्रवं चाश्रये !

–डॉ० रमाकान्त शुक्लः

आर ६ वाणी विहारः, नयी दिल्ली–११००५९

मित्रतां कामये शात्रवं चाश्रये, पार्श्ववर्ती तवाहं सदा कूटधीः।
त्वद्गृहे त्वद्विरुद्धं भणाम्यप्रियं आतिथेय! त्वदीयोऽतिथिश्चास्म्यहम्॥

शैशवे क्रीडितं यत्र गेहे मया, मातुलो मेऽवसद् यत्र गेहे पुरा ।
तद् गृहं द्रष्टुमत्युत्सुकश्चास्म्यहम् नैव शात्याः कृतेऽस्म्युत्सुकः किन्त्वहम्॥

न ह्युपेक्षे विवादास्पदानुद्धतान् गेहविस्फोटकान् त्वद्गृहे भाषितुम्।
पूर्वमेतैः सहाहं वदिष्यामि भो त्वां ततोऽहं वदाम्यप्रियं वा प्रियम् ॥

वाचि चित्तेऽथ कार्ये न चैकोऽस्मि भो दर्शनीयं स्थलं वीक्ष्य मोदं भजे।
भोजनं स्वादु तेऽहं करिष्ये परं नैव संयुक्तघोषं करिष्याम्यहम् ॥

त्वद्गृहे यच्च संगीतमायोज्यते तत्स्वकर्णातिथीकर्तुमस्म्युत्सुकः ।
किन्तु दातुं न पार्श्वे ममास्ते कणो त्वत्सकाशाच्च सर्वं जिघृक्षाम्यहम्॥

त्वद्व्यवस्थापिते सौधकक्षे सखे रात्रिरेषा मया वै कथं नीयताम् ।
दीयतां मेऽवकाशो विवक्षां स्वकां येन शान्तां विधातुं क्षमः स्यामहम् ॥

अस्मि मार्जारिका सिंहगेहे स्थिता गर्जनं कुर्वती म्याँउशब्दैः स्वकैः ।
त्वं तु शान्तिं चिकीर्षुः सखे गेहयोस्तावकं श्रद्धधे नो वचः किन्त्वहम्॥

आगतोऽहं गृहं ते सखे याचितुं उत्तमाङ्गं त्वदीयस्य गेहस्य वै ।
दीयतां मह्यमेतद् यथा मद्गृहे वर्धतां मे प्रतिष्ठा सुखी स्यामहम् ॥

त्वच्छिरो नास्ति ते, तत्र वादोऽस्ति भो मामकस्तत्र चास्तेऽधिकारः परः।
दीयतां त्वच्छिरो मे, विवादो भवेद् येन शान्तोऽथ मैत्रीं च पुष्णाम्यहम्॥

त्वं त्वतीवासि रे निष्ठुरो मित्र मे, नो शृणोषि त्वमीषन्ममाभाषितम् ।
त्वं न दत्से यदा मे ममाकांक्षितं यामि नैजं गृहं रिक्तहस्तोऽप्यहम्॥

वर्तसे मेऽग्रजस्त्वं यतस्तत् सखे, त्वं न किञ्चिद्ददेः त्वं शृणुष्वैव माम्।
अन्यथेमां परित्यज्य वार्तां सखे! यामि नैजं गृहं वै निशीथेऽप्यहम् ॥

यामि हंहो कथंकारमस्माद् गृहाद् रिक्तहस्तः स्वकं गेहमद्य प्रभो ।
मर्षयिष्यन्ति मां नो जना मे गृहे स्वाननं तान् कथं दर्शयिष्याम्यहम्॥

प्रकाशकिरणावली

—प्रकाशचन्द्रो मिश्रः
ए०डी०एम० (सेवानिवृत्तः)
११४, मिश्राना, मैनपुरी-२०५००१

श्रीरामस्तवः

अभक्तं विषयासक्तं पाहि मां रघुनन्दन ।
पापहेतोः परित्यक्तुं दीनपालक नार्हसि ॥

सज्जनप्रीतिपात्राय दुष्टेभ्यो दण्डदायिने ।
शीलरूपाय भूपाय श्रीरामाय नमोऽस्तु मे ॥

रघूणां कीर्तिभूताय निष्कारणकृपालवे ।
दात्रे चायाचकत्वस्य श्रीरामाय नमोऽस्तु मे ॥

गृहशान्तिसमृद्ध्यर्थं स्वात्मानन्दानुभूतये ।
गुणग्रामाभिरामाय श्रीरामाय नमोऽस्तु मे ॥

श्रीकृष्णाद् याचितम्

मनः प्रियतमं पुंसां नालं तदहमर्पितुम् ।
कथ्यसे कर्षणात्कृष्णस्तस्मादाकर्ष तत्स्वयम् ॥

मनस्तापतमोहारिन् नवनीतहर प्रभो ।
हे हे हरणशील त्वं हर मे मनसस्तमः ॥

श्रीपञ्चास्यपञ्चकम्

सर्वशक्तिनिधानोऽपि योऽगेहश्च दिगम्बरः ।
एवं शिक्षयते[1] त्यागं पञ्चास्याय नमो नमः ॥

१. शिक्ष+णिच्+शतृ=शिक्षयत्, तस्मै।

पीत्वा महाविषं नित्यं जग्ध्वा धत्तूरकं फलम् ।
विकारं नैति यस्तस्मै पञ्चास्याय नमो नमः ॥

पीतं हालाहलं येन विश्वकल्याणकारिणा ।
तस्मै देवाधिदेवाय पञ्चास्याय नमो नमः ॥

सर्वथा कामशून्याय देवानां हितकाम्यया ।
गृहाश्रमप्रविष्टाय पञ्चास्याय नमो नमः ॥

यत्पादप्लवमास्थाय निस्तरन्ति भवं जनाः ।
भुक्तिमुक्तिप्रदात्रे मे पञ्चास्याय नमो नमः ॥

महादेव्याराधनम्

जगन्मातर्महादेवि सर्वमङ्गलकारिणि ।
स्वकीयां नः कृपां देहि प्रसीद परमेश्वरि ॥

त्यक्तगर्ह्या वयं स्याम पुण्यभाजश्च सर्वदा ।
अस्माकं दुष्प्रवृत्तीश्च दूरीकुर्याः प्रतिक्षणम् ॥

दत्तचित्ताः शुभे लाभे भवेयाहं च मामकाः ।
अस्मभ्यमशुभो लाभो रोचतां न मनागपि ॥

असत्यं प्रति नायातु जीवने नः कदाचन ।
साधूनां सङ्गतिर्नित्यं स्यादस्माकं पदे पदे ॥

यावज्जीवं हरेर्भक्तिः सम्बलं नः सदा भवेत् ।
दारिद्र्यं दुर्मतिं दुःखं दूरीकुरु हरप्रिये ॥

आयान्तु याचका नित्यं निर्याच्ञा यान्तु सर्वदा ।
उत्सवाः स्युर्नवाः नित्यं सर्वदा त्वत्प्रसादतः ॥

बलं देह्यभयं देहि यस्मान्न बिभयान्यहम् ।
रक्ष्यं सदैव रक्षाणि त्वत्कृपातो महेश्वरि ॥

सर्वदा सर्वदासीति सत्यमेवोच्यते बुधैः ।
शक्तिरूपे महालक्ष्मि किन्त्विदं ते कृपाफलम् ॥

याचितं न मया मातर्यदन्यद्धितकारकम् ।
त्वया तदपि दातव्यमस्मभ्यं हितकाम्यया ॥

श्रीमद्भगवद्गीता

पेयं गीतामृतं नित्यं सर्वैः कल्याणकाङ्क्षिभिः ।
साक्षाद् भगवता दत्तं लोकानुग्रहकाङ्क्षया ॥

असाध्यभवरोगाणामौषधं ह्येनदुत्तमम् ।
कण्ठमार्गेण हृद्देशं प्रापणीयं प्रयत्नतः ॥

इत्थं कृते झटित्येव भवेन्ना निर्भयः सदा ।
भूरियं नरकीभूता क्षिप्रं नन्दनतां व्रजेत् ॥

'उद्धरेदात्मानात्मानं नात्मानमवसादयेत्' ।
इमं मन्त्रं ददौ या सा गीता कस्मै न रोचते ॥

गीतैकं शरणं नॄणां ज्ञानानां ज्ञानमुत्तमम् ।
विनैतद्धि गतिर्नास्ति गतिर्नास्तीति तत्त्वतः ॥

ममत्वमीमांसा

शक्तिः क्षेमाय सप्रेमा निष्प्रेमा सा भयङ्करा ।
प्रेमाणं हि ततो मन्ये साक्षाज्जगति शङ्करम् ॥

तस्य प्रेम्णस्तु सञ्चारो ममत्वेनैव जायते ।
आद्यं शुभकरं तस्मान्ममत्वं मे प्रतीयते ॥

अधमं मध्यमं श्रेष्ठं ममत्वं त्रिविधं मतम् ।
अतस्तद् विबुधैर्ग्राह्यं सर्वदैवोत्तरोत्तरम् ॥

व्यष्ट्यहङ्कारजातं तु ममत्वं हीनमुच्यते ।
बध्यन्ते तेन लोका हि तस्मात्त्याज्यं सदा बुधैः ॥

एकेश्वरसमुद्भूता वसुधैव कुटुम्बकम् ।
इति मत्त्वा ममत्वं यद् मध्यमं तत्प्रकीर्तितम् ॥

विविधानि स्वरूपाणि दृश्यन्ते यानि सर्वतः ।
व्याप्तोऽहं तेषु सर्वेषु तच्छ्रेष्ठमिति निश्चितम् ॥

अस्थाने गर्हितं लोके ममत्वं नात्र संशयः ।
व्याप्य लोकं हितं तद्धि तस्मात्तस्मै नमोऽस्तु मे ॥

मेघमहिमा

प्राप्तं क्षारं जलं यस्तु मिष्टीकृत्य प्रयच्छति ।
ईदृगुदारचेतास्तु मेघादन्यो न दृश्यते ॥

आगतेभ्यः प्रयच्छन्ति दातारः सर्व एव हि ।
स्वयं गत्वा प्रदातारं प्रशंस्यान्यम्बुदं कथम् ॥

सन्ताप्य जगतीं सर्वां रविर्यस्तु पलायितः ।
चरन्ति दिक्षु तं बद्धुं तडित्पाशाः पयोधराः ॥

कस्य दूषणम्

नेतारो वञ्चने दक्षा जनता स्वार्थसाधिका ।
देशे कुशासनं व्याप्तं न जाने कस्य दूषणम् ॥

न्यायाधीशा न निष्पक्षाः साक्षिणोऽसत्यभाषिणः ।
न्यायो न्यायालयाद्भीतो न जाने कस्य दूषणम् ॥

पुत्रीयन्ति स्म ये शिष्यान् गुरवस्तेऽद्य दुर्लभाः ।
पित्रीयन्ति न छात्रास्तान् न जाने कस्य दूषणम् ॥

छात्रा नैव पठन्त्यत्र शिक्षयन्ति न शिक्षकाः ।
स्वनाशं शङ्कते विद्या न जाने कस्य दूषणम् ॥

चन्दनैश्चर्चिताः काका राजहंसा उपेक्षिताः ।
व्यत्यासोऽपूज्यपूज्यानां न जाने कस्य दूषणम् ॥

सज्जना भयसन्त्रस्ता निर्भया उग्रकारिणः ।
लुप्तं तन्त्रं प्रजातन्त्रे न जाने कस्य दूषणम् ॥

अन्तरेण हि मानुष्यं देशे सर्वं विनिर्मितम् ।
अनर्थोऽयं महाञ्जातो न जाने कस्य दूषणम् ॥

विषमा हि वयं सर्वे स्वकर्तव्यपराङ्मुखाः ।
परस्परं विनिन्दामो न जाने कस्य दूषणम् ॥

प्रजातन्त्रम्

वन्द्यमस्मत्प्रजातन्त्रं समलोष्टाश्मकाञ्चनम् ।
काकानां राजहंसानां बलवत्यत्र तुल्यता ॥

यदा देशस्य नेतारो दस्युलुण्टाकवञ्चकाः ।
अभ्युत्थानस्य देशस्य तदाशा स्वप्नसन्निभा ॥

दस्युभिर्वञ्चकैः धूर्तैः देशोऽयं रक्ष्यते यदि ।
स्मर्तव्याः के विनाशार्थं चिन्त्यमेतन्मनीषिभिः ॥

आसन्द्यासन्दि कुर्वाणा मुष्टामुष्टि च संसदि ।
ईदृशाः सन्ति सभ्याश्चेदसभ्याः सन्ति कीदृशाः ॥

विलक्षणे हि देशेऽस्मिन् नेतारोऽपि विलक्षणाः ।
नानुयान्ति जनास्तांस्तु जनानेवानुयान्ति ते ॥

पेटिकाः प्रसभं हृत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं रक्ष्यते देशः कथं तर्हि विनाश्यते ॥

येन नेत्रीकृता धूर्ता दस्यवो राज्यमानिताः ।
कथं त्वैतत्प्रजातन्त्रं योगक्षेमं विधास्यति ॥

धन्यं धन्यं प्रजातन्त्रं सर्वत्रैवेति घोष्यते ।
तथैवास्तु प्रभुं याचे नेदानीं तत्तु तादृशम् ॥

पर्जन्यपञ्चकम्

संगृह्यापो भूमावब्धिः ।
तद्दत्त्वा खे मेघो धन्यः ॥

द्वारं द्वारं गत्त्वा दत्ते ।
पानीयं यो मेघो धन्यः ॥

सन्तप्तारं भानुं बन्द्धुं ।
विद्युद्रज्जुर्मेघो धन्यः ॥

क्षारं तोयं क्षीरं कृत्वा ।
नृभ्यो दत्ते मेघो धन्यः ॥

तप्तं विश्वं शीतीकृत्वा ।
रिक्तीभूतो मेघो धन्यः ॥

नवसंवत्सरशुभाशंसा

नवे वर्षे करोत्वीशो महतीमीदृशीं कृपाम् ।
यया पूर्णत्वमायान्तु भवतां शुभकामनाः ॥

पालयाम निजं धर्मं यथाशक्ति यथास्थिति ।
प्रीणातु येन विश्वेशः सर्वभूतहिताय हि ॥

महर्षिपाणिनिपादाभिवन्दनम्

विद्यारत्नाकरो नूनं पाणिनीयं यदुच्यते ।
महारत्नानि गृह्णन्ति यथाशक्ति ततो नराः ॥

यस्य ज्ञानं विना पुंसां वाणी शुद्धा न जायते ।
तच्छास्त्रस्य प्रणेतारं दण्डवत्प्रणमाम्यहम् ॥

गुरुवर्यविद्यावारिधिश्रीबच्चूलालावस्थिपादपद्मेषु

साक्षाद्धर्मावतारो यः सरलो बालवत्तथा ।
श्रीबच्चूलालनामापि महिष्ठो महतामपि ॥

पारगः सर्वशास्त्राणां विदुषां ज्ञानवर्धनः ।
महाकालप्रसादेन शरण्यो नश्चिरं भवेत् ॥

श्रीराधाराधनम्

आसृष्टेः हि सखीभूतः कृष्णः प्रीणाति यां सदा ।
वृषभानुसुतां तां तु कीर्तयेन्मनुजः कथम् ॥

नियन्त्री या नियन्तुश्च मोहनस्यापि मोहिनी ।
वन्द्या च विश्ववन्द्यस्य सा राधा शरणं मम ॥

नर्तयत्यखिलं विश्वं साक्षाद् यो जगदीश्वरः ।
यां राधां सर्वतः सैव नृत्यति तां नमाम्यहम् ॥

श्रीगुरुगरिमा

अज्ञानतिमिरान्धाय ज्योतिर्दत्ते गुरोः कृपा ।
तत्कर्तुमक्षमो भानुस्तस्माद् गुरुतरो गुरुः ॥

प्रकीर्णम्

लिखितं किं विचारोऽयं साम्प्रतं न हि साम्प्रतम्।
कस्योक्तिः कस्य वा लेख इत्येवादरकरणम् ॥

प्रकाशं कुरुते दीपो दाहं सोढ्वा शनैः शनैः ।
जनसेवाचिकीर्षूणां दुःखं हि परमा गतिः ॥

स्वविवेकविहीनाय वृथा वाणी वृहस्पतेः ।
नेत्रहीनं नरं नेतुं न शक्नोति रविः स्वयम् ॥

पङ्कजान्यपि फुल्लन्ति वीक्ष्य मित्रोदयं खलु ।
ये नो हृष्यन्ति तेनापि ते नरा ननु किन्नराः ॥

पङ्कज कमलाख्यं किं कृतं तत्त्वज्ञपण्डितैः ।
फुल्लेन्मित्रोदयाद्यत्तु नूनं तन्मानमर्हति ॥

ददन्ते य उषस्येव सलिलं बालभाजवे ।
असौ दहति तानेव मध्याह्ने नेति साम्प्रतम् ॥

आचरन्तकि लोका हि शिक्षयन्तकि शिक्षकाः ।
नयन्तकि च नेतारस्ततः क्षेमस्य का कथा ॥

स्वभावतः कृतघ्नस्तु लोकैः नोपचिकीर्ष्यते ।
प्रथमं लेढि दातारं स पुनस्तन्तु दंशति ॥

नष्टा नष्टा पुनर्नष्टा सृष्टिरद्यापि जीवति ।
दर्शं दर्शमिदं मन्ये जीवितेन जिता मृतिः ॥

अनुकूलितभार्याकः कलिमुक्तालयः सदा ।
त्रियम्बकोऽपि मत्त्वेति भार्याराधनतत्परः ॥

वायसन्ति शृगालन्ति भुजङ्गन्तीह मानवाः ।
न मनुष्यति धिक् कोऽपि कीदृशीयं विडम्बना ॥

अर्जितं धनमित्येव सम्मानस्यैककारणम् ।
कथं प्राप्तं धनं तत्तु नैतत्केनापि चिन्त्यते ॥

न तत्याज प्रभुर्यावद् अव्यक्तेरवगुण्ठनम् ।
तावन्निरपवादः स गतो व्यक्तस्तु वाच्यताम् ॥

भाषमाणे सदस्यन्ये वार्तालापं करोति यः ।
कियानपि महान् सोऽस्तु सभ्यार्हो न कदाचन ॥

मनो नपुंसकं जेतुं सुकरं नेति निश्चितम् ।
अतस्तृणं न मन्तव्यो निर्बलोऽपि रिपुर्बुधैः ॥

तेजस्वन्तस्तथा दुष्टा मन्यन्ते न कृतं मनाक् ।
लब्ध्वार्घ्यं दाहको भानुः क्रूरः पीत्वा पयोऽप्यहिः॥

लभ्यते स्म जनैर्मानः पुरापि धनकारणात् ।
धनमासीत्तदा गौणं मुख्यत्वं लभतेऽधुना ॥

रिरंसते पुराणोऽपि चन्द्रमा सह राकया ।
दुर्जेयो मन्मथो लोके मनुष्याणां जरस्यपि ॥

आद्रियन्ते न केनापि कदापि जितकाशिनः ।
नातो विकत्थते भानुर्विनाश्य हि भुवस्तमः ॥

सर्वप्रिया हि सद्वृत्ता दुर्वृत्ता न तु कस्यचित् ।
सुगन्धः पवनः काम्यो दुर्गन्धो न कदाचन ॥

त्राहि त्राहीति किं ब्रूषे पुराणं पुरुषोत्तमम् ।
त्रस्तोऽस्मद्दुष्कृतैः सोऽपि त्राहि त्राहीति क्रन्दति॥

पतन्तं मानुषं दृष्ट्वा मोदन्ते ह्यधमा जनाः ।
मध्यमास्तमुपेक्षन्ते ये द्रवन्ति त उत्तमाः ॥

सेवकं स्वामिभूतं तु नो सहन्तेऽप्यपण्डिताः ।
धिग् धनं स्वामिनं कृत्वा धन्यम्मन्या हि पण्डिताः ॥

श्रवणे द्वे कृते तस्माद् विदग्धेन स्वयंभुवा ।
श्रुत्वैकेनाशुभं कुर्याद् बहिरन्येन तत्क्षणम् ॥

श्रुते द्वे रसनैका तु सोद्देश्यं ब्रह्मणा कृताः ।
बहु श्रुत्वापि वक्तव्यमत्यल्पं भूतिमिच्छता ॥

अद्भुतं रचितं धात्रा विश्वस्मिन् गोलिकाद्वयम् ।
यत्तु भिन्नप्रयोगेन ज्वरनिर्ज्वरकारणम् ॥

शैशवे दत्तकान् वृक्षाः सेवन्ते मधुरैः फलैः ।
तथैव पितरौ सेव्यौ विविधं लालितैः सुतैः ॥

लब्धं प्रेमास्पदाद् यद्धि प्रेमी तेन सुखायते ।
वृण्वानः शलभो मृत्युं मुदालिङ्गति दीपकम् ॥

अन्वाजेकृत्य ये धीराः सार्थीकुर्वन्ति जीवितम् ।
तेभ्यः प्रीणाति गोविन्दो दीनबन्धुप्रियो हरिः ॥

जीवेतां दम्पती दिष्ट्या प्राध्वं कृत्य परस्परम् ।
सन्ततिः श्लाघनीया स्याच्चातिस्वर्गं तयोर्गृहम् ॥

अदःकृत्यैव कर्तव्यं नित्यमात्मनिरीक्षणम् ।
तदभावे न चन्द्रस्य मृष्टोऽङ्कोऽद्यापि भानुना ॥

पितू रिक्थमिवाप्नोति पापान्यपि तथात्मजः ।
ह्यापनीयान्यतस्तानि सर्वैरेव विचक्षणैः ॥

सद्यः प्रस्फुटितं पुष्पं रूपगन्धसमन्वितम् ।
रचितं जनमोदाय यो नाकृष्टः स किन्नरः ॥

अन्तर्भिन्नं स्वमात्मानं युक्तं दर्शयितुं क्षमा ।
नादेयि ते प्रयासोऽयं नूनमात्मप्रवञ्चनम् ॥

आदाय नियतिं स्वां स्वामुत्पद्यन्तेऽत्र मानवाः ।
अतो भद्रं यथाशक्ति कुर्वञ्जीवेत्सुखं नरः ॥

उचितं तु मृते ताते दाहः कापालिकी क्रिया ।
क्रियते तत्कलौ हन्त ! सुतैः पितरि जीविते ॥

यथाकालं कठोरत्वं कस्मै नो रोचते भुवि ।
कठोरसाधनप्रीता कामिनी किङ्करायते ॥

कस्याप्युद्दण्डतां सोढुं न शक्नोति विधिश्चिरम् ।
सङ्गरे पतितं दृष्ट्वा ध्वजमेतन्मतं मम ॥

मा शुचः स जगद्धर्ता त्वामपि पालयिष्यति ।
पादपा यत्कृपासिक्ता वर्धन्ते काननेष्वपि ॥

असमीक्ष्य भिषक्चर्यां निर्देशस्तस्य पाल्यते ।
सैव बुद्धिर्गुरौ चेत्तु को रुधान्नः समुन्नतिम् ॥

लक्ष्मी श्रेयस्करी न्याय्या सोत्कोचा विपदाकरी ।
विस्मरन् सत्यमेतद्धि ना सीदति पदे पदे ॥

आशीर्या दीयते वृद्धैः सफला सा तु भाग्यतः ।
प्राप्यते सेवया या सा निश्चितं सफलायते ॥

राज्ञः पदे समारूढो राज्यं[१] नो विस्मरेन्नरः ।
लवणं गतलावण्यं लवणीक्रियते कथम् ॥

बहवः खलगृह्या[२]स्तु सद्गृह्या विरलाः कलौ ।
इति मत्त्वा खलैः सार्धं विवदन्ते न पण्डिताः ॥

हानौ लाभे सुखे दुःखे श्रेयसे समवर्तनम् ।
तदेव सर्वनाशाय कृतं पापेषु सत्सु चेत् ॥

---

१. राज्यम्–राज्ञः कर्म्म भावो वा इति हलायुधः।

२. गृह्यः–पदास्वैरिं बाह्यापक्षेषु च–अष्टा० ३/१/११९

वर्त्तितव्यं यथाकालमिति शिक्षयितुं नरम् ।
सविलम्बं हिमे ग्रीष्मे प्रातराक्रमते रविः ॥

फलिनो ये समूलं हि क्षिप्रमुच्छेत्तुमुत्सुकाः ।
तेषु तूद्यानपालेषु किमत्याक्रोशनं नृणाम् ॥

विपर्यस्तं जगत्सर्वं विष्णौ मीलितलोचने ।
किं पुनर्यदि राजापि विष्णूयेत स्वकर्मसु ॥

पितरौ मे न पुत्रौ मे भ्रातरौ गृहिणी न मे।
बहुरूपो जगन्नाथो ह्युपकर्तुमिहागतः ॥

शोभते चाटु तावत्तु प्रच्छन्नं यावदेव तत्।
अन्यथा सर्वथा चारु यथा योषिदनावृता ॥

महतामाश्रयं प्राप्य याति बालोऽपि वन्द्यताम् ।
मृत्युञ्जयालिकापन्नो यथा कुमुदबान्धवः ॥

पितुः पुत्रस्य भार्यायाः सुहृदौ बान्धवस्य च ।
अकिञ्चनत्वमापन्नोऽगम्यः सर्वस्य ब्रह्मवत् ॥

जर्जरं म्रियमाणं च कथमायान्तु बान्धवाः ।
पतन्तीं भित्तिमालोक्य को हि दूरं न गच्छति ॥

समाना मनुजाः सर्वे कथयत्विति मूढधीः ।
सज्जनेषु च दुष्टेषु समदर्शी न दृश्यते ॥

नोपेक्ष्याः कस्यचिद्दोषा गुरोर्वा सुहृदोऽपि वा ।
अवदेयस्तु तांस्तेभ्यो नरस्तेष्वपराध्यति ॥

आत्मसात् तत्तु कर्तव्यं यज्ज्ञानमुपलभ्यते ।
हनिष्यत्यन्यथा तन्नः कोष्ठस्थाजीर्णभुक्तवत् ॥

घातकं विषपानं तु सुरापानं ततोऽधिकम् ।
विषं हरति प्राणान् हि सुरा प्राणान् धनानि च ॥

सहमाना अनौचित्यं नो मूकन्तु मनीषिणः ।
तमोनाशाय विश्वस्मिन्नुदेति सविता खलु ॥

कूप त्वं परमोदारो विवेकी चाप्यसंशयम् ।
जीवनं स्वं मुदा दत्से किन्तूद्योगिन एव हि ॥

औदार्ये ह्यद्वितीयोऽपि किन्तु नासि विवेकवान् ।
पात्रापात्रमवीक्ष्यैव मेघ सर्वत्र वर्षसि ॥

वीक्ष्य प्रज्वलितं दीपं जातेयमवधारणा ।
स्नेहस्त्याज्यः सदा पुम्भिः सैष ज्वलनकारणम् ॥

नद्यः कूलङ्कषा नूनं मनुष्याणां मनोव्यथाः ।
पातयन्ति क्षणेनैव नृविवेकदृढद्रुमान् ॥

व्यापृतो लोककार्येषु पितृसेवाक्षमोऽभवत् ।
नन्दप्राणप्रियः कृष्णः गर्ह्यते हि वृथा कलिः ॥

आदर्शवत्सदाऽऽचार्यः पूर्णो भवतु सर्वथा ।
आदर्शे खण्डिते लोके मुखं कोऽपि न पश्यति ॥

अधिकारी गुरूभूय ब्रह्मा विष्णुर्महेश्वरः ।
तद्भूतो लम्पटो नूनं जायते केवलं हरः ॥

पापाज्जातः कदाचारे पापादप्यतितिष्ठते ।
तथापि रोचते पापं किं न्विदं पापखेलनम् ॥

स्वकर्तव्यानकुर्वाणा धनं गृह्णन्ति ये मुदा ।
चौरवत्ते न दण्ड्याः किं निर्णेतव्यं बुधैरिति ॥

हे सुन्दरि ! त्वया दत्तं स्याद्दण्डमपि सुन्दरम् ।
मारणं स्यात्कटाक्षैस्तद् बन्धनं स्यात्तु चेतसि ॥

दर्शनं[1] दर्शनं[2] स्यान्मे केवलं न प्रदर्शनम् ।
वरदेमं वरं देहि वृणुयां जीवने वरम् ॥

मेघ त्वं परमो हंसो विश्वस्मिन्नेकदर्शनः ।
भेदभावं विना दत्से यस्मै कस्मै स्वजीवनम् ॥

क्षारायते समुद्रे कं रोगायैवातिभोजनम् ।
मृत्यवेऽतिमलत्यागस्तस्मात्त्याज्यं बुधैरति ॥

हेतुनानेव जन्माहो भृशं मोदाय जायते ।
कालमामृत्युबन्धस्य ध्रुवं न्यूनीकरोत्यदः ॥

अविजेष्यन्त सङ्ग्रामान् स्थैरिणो गर्दभा यदि ।
अक्रेष्यत्तर्हि को लोके बाह्लिकान् बहुमूल्यकान् ॥

औदार्येण पदं सम्पद् मेधा कीर्तिश्च विद्धता ।
दीयते ब्रह्मणा किन्तु कार्पण्येन मनुष्यता ॥

एको हि दोषो गुणसन्निपाते निमज्जतीति प्रतिभात्यसत्यम् ।
सत्यावतारस्य युधिष्ठिरस्य मिथ्योक्तिरेका यशसो विनष्ट्यै ॥

अनुत्तरा ध्रुवं नारी त्रैलोक्या ऐन्द्रजालिकी ।
यया भेकीकृता विज्ञा बम्भ्रम्यन्तेऽपथेष्वपि[3] ॥

दीयते ज्ञानमन्येभ्य आत्मज्ञानं विना कथम् ।
अप्रकाशितदीपेन प्रकाशो दीयते क्वचित् ॥

पुंश्चलीव सुखं शेते निद्रा युवजनैः सह ।
वृद्धैरभ्यर्थमानापि सा तेभ्यो हि जुगुप्सते ॥

---

१. दर्शनम्–धर्म-शास्त्रं-Philosophy इति हलायुधः
२. दर्शनम्–दर्पणः दृश्यते यथार्थतत्त्वमनेन। इति हलायुधः
३. अपथम् अमार्गे यौनौ इति शब्दार्थचिन्तामणिः।

मोदाय कविता चेत्सा वनितेवोपतिष्ठते ।
बलादाकृष्यमाणा तु भृशं हि विरसायते ॥

निष्कलङ्को न चन्द्रोऽपि विषमप्यौषधं क्वचित् ।
प्रशस्यं सर्वथा किं स्यान्निन्द्यं किं स्यात्तु सर्वथा ॥

निर्गन्धं कुसुमं नूनं कस्यैचिन्नापि रोचते ।
प्रेमशून्यं मनस्तर्हि केषां प्रीतिकरं भवेत् ॥

सर्वान् विघ्नान् पराजित्य गन्तव्यं यः प्रतिष्ठते ।
स्वयमेव हि गन्तव्यः सोत्कण्ठं तं प्रतीक्षते ॥

श्रेयसे प्रेयसे वापि भगवत्प्रतिलब्धये ।
धर्मप्राणो नरो यस्तु न विब्रूते कदाचन ॥

विद्यारत्नाकरः केन निःशेषमवगाहितः ।
अधिविद्यमतो गर्वो युज्यते न मनीषिभिः ॥

न भुवः शान्तिनाशाय मानवा बालिशा हि ये ।
किन्तु कौ कण्टकायन्ते जना मायाविनो भृशम् ॥

सानुतापं हरेर्नाम जपतो स्खलतोऽपि च ।
तथा ज्वलन्ति पापानि यथैधांसि हुताशने ॥

आचार्यश्रीरमाकान्तमहाभागपादपद्मेषु

श्रीरमादेववाण्यो य उभयोः प्रीतिभाजनम् ।
मनोवाक्कायशुक्लश्च तं श्रीशुक्लं नमाम्यहम् ॥

रचनाधर्मिणो नव्यान् प्रोत्साहयति यो मुदा ।
चिरंजीव्याच्च जीयाच्च भारतीकीर्तिवर्धनः ॥

❖ ❖ ❖

अवस्थिनो बच्चूलालस्य प्रतानिनी*

–डॉ० धर्मेन्द्रकुमारसिंहदेवः
संस्कृतविभागः, डॉ० हरिसिंहगौरविश्वविद्यालयः,
सागरम्, मध्य प्रदेशः

उपक्रमः

संस्कृतम् आधुनिकम्। काव्यं नवम्। कविश्च वयोवृद्धो ज्ञानवृद्धश्च। आधुनिके संस्कृते के वा न जानन्ति ज्ञानोपाह्वम् अवस्थिनं बच्चूलालम्। प्रौढे वयसि रचितानेन प्रतानिनी। प्रतानिनी नाम कवेः प्रतिभाप्रसूता ज्ञानानुभूतेर्निकषशीला कापि विलक्षणा कवितासङ्ग्रहात्मिका प्रौढा रचना। पञ्चप्रतानात्मिकेयं प्रतानिनी। तत्र स्तवकप्रतानः प्रथमः। अन्योक्तिप्रतानो द्वितीयः। गजलगीतिप्रतानस्तृतीयः। विरागप्रतानस्तुरीयः। प्रकीर्णप्रतानश्चान्तिमः पञ्चमः। समग्रापि प्रतानिनी पारम्परिकैश्छन्दोबन्धैः संग्रथिता। कवेः काव्येषु भावप्रवणतायाः प्रवाहे भाषाया अधिकारश्चानन्यसामान्यः। वैदुष्यपूर्णोऽयं काव्यसंग्रह आधुनिके संस्कृतसाहित्ये सर्वान् अतिशेते। अत्र प्राचीनपरम्परायाः प्रवाहे नूतनस्यार्थस्याभिधाने सिद्धहस्तः कविरिति निर्विवाद एव। कलापक्षस्तु पारम्परिकः, परमाधुनिक एव भावपक्ष इति। अतः परमत्र शोधपत्रे प्रतानानुसारेण प्रतिपाद्यं वैशिष्ट्यं च प्रतिपादयितुं प्रयत्नः कृतो विद्यते।

१. स्तवकप्रतानः

पञ्चशाखिकायां प्रतानिन्यां स्तवकप्रतानो नाम प्रथमः। तत्र चतुर्दश स्तवका उपनिबद्धाः सन्ति।

१.१ प्रतिपाद्यम्

अत्र प्रतिपाद्यं त्रिधा विभक्तुं शक्यते। क्वचित् स्वरूपनिरूपणम्, क्वचिदात्मनिवेदनम्, क्वचिच्च स्वानुभूतेरुपस्थापनमिति।

---

*प्रतानिनी (विविधविषयणी प्रत्यग्रकाव्यसङ्कलना), ज्ञानोपाह्वोऽवस्थी बच्चूलालः, सं० मिश्रोऽभिराजराजेन्द्रः, वैजयन्त-प्रकाशनम्, इलाहाबाद, १९९६. पृष्ठसंख्या –३०७.

१.१.१. **स्वरूपनिरूपणम्**–अद्वैतस्यानुभूतौ आत्मनः परमात्मनि तथा लयो जायते येन जीवात्मनः पृथक्ताया नानुभूतिः सम्भवति। यत्र च जीवात्मपरमात्मनो-र्भेदस्य नैव जायते प्रतीतिः। प्रतानिन्यां 'अद्वयस्योपलम्भ' इति प्रथमस्तवकस्य स्वरूपं तथैव निरूपितं वर्तते। यथा–

हन्त सर्वे प्रदीपा गता निर्वृतिं यत्क्षणे त्वं रहस्येव साक्षात्कृतः
।किं विशिष्येत शिष्येत का प्रार्थना दृश्यमात्रस्य दृग्वर्तनान्निर्गमे
।। रूपमास्थातुमित्थन्तया न क्षमे ।। (अद्वयस्योपलम्भः, पृ० २६)

अपि च अम्बिकायाः स्वरूपनिरूपणं तावन्महामायात्वेन ब्रह्मशक्तित्वेन वा पुरस्कृतं विद्यते। रजसा ब्रह्माणं सत्त्वेन विष्णुं तमसा च रुद्रं घटयित्वा एषा शक्तिरेव विहरतीति प्रतिपादयति ज्ञानकविः। तथा हि–

या लोकान् कर्तुकामा विहरति रजसा रञ्जयन्ती परेशं
स्थित्यै सत्त्वेन साकं घटयति तमसा संहृतौ सम्पृणक्ति ।
त्रैगुण्याद् देवमेकं कलयति कलया त्रिस्वरूपं स्वरूपात्
सा भूयाद् भूतिसार-प्रसर-सरसिजामोदिनी मङ्गलाय ।।

किञ्च संस्कृतभाषायाः स्वरूपनिरूपणे कविर्निजगाद–

दूर्वेव प्रतिपर्व रोहतितरां दुग्धे सुधाधेनुवद्
रम्भेव प्रतिपत्रपत्रितगतिः सुस्वादु पम्फुल्यते ।
मातेव प्रतिपालयत्यरिजने सिंहीव जागृज्यते
सेयं संस्कृतभारती सुमनसां सन्मानसे सज्जतात् ।।

(वाग्दैवतम्, पृ. ४३)

१.१.२. आत्मनिवेदनम्–प्रायशः स्तोत्रेण स्तुतिकर्ता सर्वथा आत्मनिवेदनं कुर्वन् दृश्यते । तथा च तेन स्तोत्रेण आत्मसमर्पणपि कर्तुं नैव विस्मरति स्तोत्रकारः । अत्रापि स्तवकप्रताने महाकालस्य सन्निधौ आत्मनिवेदनमतीव गूढं प्रकटयति। यथा–

मन्ये पुण्यकृतां महाव्रतवतां नो जातु सङ्गः कृतो
मन्ये चास्मि जनो जुगुप्सितजुषां पापात्मनां जोषणः ।

भस्मोद्धूलनहेतवे तव महाकालेश्वर ब्रूहि तत् ।
सिप्रारोधसि संचिता मम चिता किं नोचिता स्यादिति ॥
(महाकालः प्रसीदतु, पृ. ३९)

एवमन्येऽपि । आत्मसमर्पणमपि क्वचित् सापकर्षस्वीकृतिमात्रेण प्रतीयते । यथा-

नरीं त्वां मन्वानो यदवमननं त्वय्यतनवं
तनूं स्वां ते तन्वाः पृथगगणयं यच्च वितथम् ।
यदौद्धत्यं बाल्ये तरुणिमनि चाहं व्यरचयं
क्षमामूर्ते सर्वं तदकृतमिव त्वं विगणय ॥
(अम्बायाः सुतवदनचुम्बा विजयते, पृ. ३१)

१.१.३. स्वानुभूतेरुपस्थापनम् – कविर्नाम सर्वत्र रचनासु स्वानुभूतिमुपस्थापयत्येव । न हि स्वानुभूतिं विहाय कस्यचित् रचयितुः काप्यभिव्यक्तिः प्रसरति । सैवानुभूतिः सहृदयान् चमत्करोति । तेन च जायते काव्येषु प्रवृत्तिः । अत्र प्रतानिन्याम् अद्वैतानुभूतिः प्रथमे स्तवके प्रत्यक्षीभवति । यथा –

वासमासंकुलस्वप्नमेलापकस्यान्तराले क्वचिद् रोमकूपोपमे ।
तूर्णमायाति, यासि प्रबोधक्षणे रूपमास्थातुमित्थन्तया न क्षमे ॥
रूपमास्थातुमित्थन्तया न क्षमे ॥ (अद्वयस्योपलम्भः, पृ. २५)

अपि च 'निद्रा' इति शीर्षके निद्राया अनुभूतिः प्रकारान्तरैः स्वरूपं गृह्णाति। तथा हि-

नाडीवेगं विलाप्य प्रतिरुधिरकणं व्याप्य संमोहनं यद्
रोम्णां कूपेषु सिन्वद् व्यवधिविरहितं सौम्यमामोदनं यत् ।
निर्द्वन्द्वं मन्दमन्दं श्वसितविलसितैर्जीवनव्यञ्जनं यत्
तत् ते निद्रे स्वरूपं विकरणकरणं कारणं कारणानाम् ॥
(निद्रा, पृ. ३७)

इत्थं स्तवकप्रतानस्य प्रतिपाद्यं वर्गीकृतसामान्येन विवेचयितुं शक्यते ।

१.२. वैशिष्ट्यम्

प्रथमत एव सर्वत्र स्तवकेषु कवेरद्वैतानुभूतिः प्रतिभाति । प्रथमे स्तवके हि कवी **'रूपमास्थातुमित्थन्तया न क्षमे'** इति कथयन्नद्वयस्योपलम्भं

पुरस्करोति। पद्यमिदं महाकविं कालिदासं स्मारयति । यथा रघुवंशे-

विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥ (रघु. १३.५)

कवेरन्तर्भावना आराध्यं प्रति आत्मानं दयनीयमनुग्राह्यं च मन्यमानस्य कामपि नवीनां स्तुतिं तनोति । यथा-

ध्यायन्ति ब्रह्म केचिन्निरवधि परमं तत्परा मोक्षमाणाः
प्राणायामैरुपासा-प्रणिहितमनसः केऽपि कैवल्यभाजः ।
अन्ये यागैर्यजन्ते श्रुतिविहितहितज्ञप्तयः स्वर्गकामाः
पाथेयं मातरेकं मम मयि कृपणे तावकीना कृपैव ॥

(अम्बिकां भावयामः, पृ. ३३)

संस्कृतां वाणीं प्रति कविः यत्स्वाभिमतं पुरस्करोति तदेव कवेर्व्याकरण-वैदुष्यं नितरामुपस्थापयति । यथा-

अद्वैतं प्रतिपादितं प्रतिपदं यद् व्याडिना संग्रहे
यन्माहेश्वर-बीजमन्त्र-विधिना सूत्रेण मालायितम् ।
तत् सर्वं प्रतिपद्य पाणिनिमतं व्यालोड्य स्द्धान्त्यता-
मास्तां स्वर्ग इहैव दैवतवचश्चिन्तामणी राजते ॥

(वाग्दैवतम्, पृ. ४२)

इत्थं प्रथमस्तवकस्य वैशिष्ट्यं विचारयितुं शक्यते ।

२. अन्योक्तिप्रतानः

अन्योक्तिप्रताने द्वितीये त्रयोदश अन्योक्तयो विलसन्ति । तत्र काश्चन मुक्तकरूपेण दृश्यन्ते । अन्याश्च प्रबन्धात्मिकतया विरचिताः सन्ति । प्रथमम् अन्योक्तिपञ्चकं विहाय सर्वा अपि कथारूपतामन्योक्तयो भजन्ति । यथा भागवते पुरञ्जनोपाख्यानमन्योक्तिरूपेणैव प्रबन्धरूपतामवगाहते । तथैव ज्ञानकविना प्रायशः अन्योक्तिषु कथारूपता स्वीकृता । क्वचिदात्मकथारूपेणापि अन्योक्तीनां रचना दृश्यन्ते ।

२.१. प्रतिपाद्यम्

ज्ञानकवेरन्योक्तयः प्रायेण जागतिक-विसङ्गतीः प्रकटयन्ति । बहवः सन्ति वाचाटा ये साधुजनं वञ्चयन्तः स्वजीवनं नयन्ति । उलूकलपितम् इत्येषान्योक्तिरुलूकद्वारेण प्रवञ्चकानां स्वभावं स्वरूपं च प्रतिपाद्य परिणामे

तादृशाणां दुर्गतिं निदर्शयति । तथा हि-

आरुह्य सालमथ कोऽप्यभिचारकर्मा
जोषं निगृह्य निपुणं तमुलूकराजम् ।
प्राध्वं विधाय वसनस्थगिकान्तरस्थं
काल्यै बलिं परदिने समुपाजहार ॥ (उलूक-लपितम्, पृ. ५६)

द्वितीयान्योक्तिरेकदन्तवृत्तमिति तामेव दुर्गतिं पुरस्करोति । केचन वञ्चका बका इव साधुतां प्रदर्शयन्तो मत्स्यान् विश्वसितान् कवलीकुर्वन्ति । अपरे कारण्डवा (जलका) इव जले ब्रुडित्वा अदृष्टाः सन्तो मत्स्यान् भक्षयित्वा जलान्निस्सरन्ति । एवम्भूता धूर्ता अज्ञाताः सन्तो जनान् वञ्चयन्ति, वञ्चनेन च जीवन्ति । क्षुद्रजनाः स्वल्पसम्पत्त्या स्तब्धा भवन्ति । स्त्रियोऽपि काश्चन क्षणिकेन यौवनेन प्राणान् मदयन्ति । 'क्षुद्रा नदी' इत्यनयान्योक्त्या एवम्भूतं व्यञ्जनं कविना कृतम् अस्मिन् अन्योक्तिप्रताने इति ।

२.२ वैशिष्ट्यम्

पण्डितराजपश्चाद् अन्योक्तीनां प्रवीणता विरलैव दृश्यत इति नात्र संशयः । परमस्यान्योक्तीनां परिशीलने पुनः अन्योक्तिपरम्परा परिमार्जिता परिवर्धिता परिष्कृता च दृश्यते ।

२.२.१. अन्योक्तिषु नवीनता – अवस्थिनः कवेः प्रत्येकमन्योक्तिः किमपि नवीनतामवश्यमेव भजति । यथा सामान्यतया लोकोक्तिषु वटवृक्षस्य महिमा एव गीयते । परन्तु न खलु तस्य नीचैः किमपि रोहतीति, इमामुक्तिं वैपरीत्येन गृहाणो ज्ञानकविः कामपि नूतनामन्योक्तिं निगदति । तथा हि-

शाखारोह-जटाल-मूल-वलयैर्येनावनी पूरिता
छाया यस्य निदाघदग्धसमितौ धत्ते परं विश्रमम् ।
सन्तानः खलु यस्य निर्जरतया विराजते नन्वसौ
न्यग्रोधो यदि नेतरान् विषहते नोपालभेरन् बुधाः ॥

(अन्योक्तिपञ्चकम्, पृ ५३)

अपि च ग्रामशुनकान् विषयीकृत्य अन्योक्तिर्यथा-

पुच्छोत्तोलनमुद्धतं परिसरे तूर्णं बलिष्ठेक्षणाद्
भीत्या भित्तिमुपेत्य कण्ठकलहो व्यापृत्तदन्तच्छदम् ।

नक्तं तस्करसख्यमेव दिवसे सभ्ये जने बुक्कनं
गुण्या वृत्तिरियं निसर्गनिपुणा ग्रामेचराणां शुनाम् ॥

(अन्योक्तिपञ्चकम्, पृ. ५३)

अत्र ग्रामकुक्कुरचरितं तथा चित्रितं यथा भीरूणां रक्षकाणां व्यापारस्य व्यञ्जना कृता । इत्थं सर्वथा नावीन्यं नैपुण्यं च कवेर्विलोक्यत इति ।

३. गजलगीतिप्रतानः

महाकवेरस्य विशेषाभिरुचिर्गजलगीतिष्वेव परिलक्ष्यते । अत्र षट्षष्टिपरिमितैः शीर्षकैर्गजलगीतयः संग्रथिताः । तत्रापि द्विपदीनां बाहुल्यं दृश्यते । यद्यपि पार्सीभाषात उर्दूभाषायां गजलशब्देन प्रचारमुपेतेयं काव्यसरणी खलु प्रेम-विषयमवलम्ब्य विरच्यते तथाप्यत्र प्रताने उर्दूभाषासरणीमवलम्ब्य यत् किञ्चिद् विनिर्मितं तत् सर्वमपि गजलशब्देन व्यपदिष्टम् इति सार्थवादो ग्राह्यः ।

३.१. प्रतिपाद्यम्

प्रायेणात्र कविना प्रेम्णः सौन्दर्यस्य च प्रतिपाद्यमुखेन वस्तुप्रतिपादनं क्रियते । अत्र द्विपदीषु कविः स्वविचारं समुपस्थापयति । तत्रापि समसामयिका एव विचारा इह प्रासङ्गिकतां भजन्ति । प्रतानिन्यांमेवमेव बहुत्र वहुधा साम्प्रतिका विचारा लभ्यन्ते । **'कस्य लीलेयम्'** इति-गीत्यां प्रायेण युगवृत्तं समाश्रित्य विसङ्गतानामाचाराणां विचाराः प्रस्तुताः । यथा जना निगूढानि पापानि कुर्वन्ति, वहिर्दृष्ट्या तपस्विनः प्रतीयन्ते । एतेषां दुराचारान् दृष्ट्वा किं कृते सज्जनाः पलायनं कुर्वन्ति इति प्रश्नं मनसि निधाय द्विपदीयं रचिता। तथा हि-

निरातङ्कं बकानां मानसे ध्यानानि पश्यन्तः ।
मरालाः किं पलायन्ते न जाने कस्य लीलेयम् ॥

(कस्य लीलेयम्, पृ. ११५)

अपि चात्रैका द्विपदी महत्त्वं लभते । यथा-

प्रिये प्राणान् परित्रायस्व मुञ्चेमं परिष्वङ्गम् ।
फणाः शेषस्य कम्पन्ते न जाने कस्य लीलेयम् ॥

(कस्य लीलेयम्, पृ. ११६)

अर्थात् सर्वत्र व्याप्तान् कदाचारिणो दृष्ट्वा सदाचारेण इयमुक्तिः सर्वथा युगवृत्तमेव चित्रयतीति ।

'किं कुर्याम्' इति शीर्षके सर्वथा गृहदस्युवृत्त्या ये धनानि अर्जयन्ति, ते निर्णये न्यायं कुर्वन्तो दृश्यन्ते, कविः किं कुर्यात् । तथा चोक्तम्-

य एव पश्यतो दिवा धनानि लुम्पन्ते ।
त एव वादनयं निर्णयन्ति किं कुर्याम् ॥ (किं कुर्याम्, पृ. ११९)

एवं साम्प्रतिका युगविचारा अत्र स्थानं लभन्त इति ।

३.२. वैशिष्ट्यम्

गजलगीतिषु प्रत्येकं द्विपदी अर्थतः पृथक्त्वं भजति । तत्रापि रचनासु कवेर्दार्शनिकी भावधारा गवेषयितुं शक्यते । यथा -

वितंसे पक्षिणः स्वे पक्षसञ्चाराः पलायन्ते ।
महाब्धौ मज्जतः कोलस्य निस्ताराः पलायन्ते ॥
(पलायन्ते, पृ. १६१)

अर्थाद् यदा पक्षी जाले निपतति तदा तस्य स्वकीया नैसर्गिकाः पक्षनिपाता न प्रभवन्ति । यदा नौका महाब्धौ मज्जति तदा तस्याः कुतो निस्तारः । इयं तावल्लौकिकी गतिरलौकिकी च व्यञ्जना सहजतया ज्ञातुं शक्यते । संसारबन्धेन निपतितस्य जीवस्य स्वाभाविकी व्यापकता दूरं व्रजति। संसारो वा सागरः, तस्मिन् निपतितो जीवो जन्म जन्मान्तरं लभमानो मोक्षरूपं निस्तारं लब्धुं नैव पारयते इति ।

अपि चैकमेव तत्त्वं बिम्बप्रतिबिम्बयोर्भेदमिव गृह्णाति । अत एव प्रतिबिम्बेषु भ्रमो जायते 'किमियं बिम्बस्य प्रतिकृति'रिति । अयमेवार्थो द्विपद्यां विषयतां प्राप्नोति । यथा-

मदीये पङ्कलिप्ते दर्पणे ते निर्मलं रूपम् ।
कथङ्कारं परिज्ञेयं कथं कृत्वा च निध्येयम् ॥
(किमुन्नेयम्, पृ. १२७)

किञ्च, पामरा जगज्जाले पतिता अपि पुनर्जन्मन्यपि तदेव प्राप्तुं समुत्सहन्ते, मोक्षं न वाञ्छन्ति । तत्र हि भोगा न लभन्त इति सूचयतीयमन्योक्तिः । तथा हि-

न भोगाः सन्ति मुक्तावित्यनुश्रुत्या हतोत्साहाः ।
मुमुक्षां पृष्ठतः कृत्वा जगज्जालं प्रतीक्षन्ते ॥

(प्रतीक्षन्ते, पृ. १६३)

एवमेव गजलगीतिषु सर्वत्र मध्ये मध्ये दार्शनिकप्रवृत्तीनां निदर्शनं सुलभं दृश्यते ।

४. विरागप्रतानः

प्रतानिन्याश्चतुर्थप्रतानस्तावद् विरागप्रतान इति निगदितः । मनुष्यः प्राक् वासनाधीनः सन् रज्यते । विषयेषु निबद्ध्यते। विषयानां च निःसारतामवलोक्य भूयो भूयः समीक्ष्य विरज्यते । वस्तुतत्त्वस्य परिज्ञानाभावेनावस्तुषु सांसारिकेषु विषयेषु रक्तो भवति । पश्चाच्च वस्तुतत्त्वं परिज्ञाय असारं संसारं निभाल्य कदाचित् कोऽपि विरागं लभते । इति विरागप्रतानस्य तात्पर्यम् ।

४.१. प्रतिपाद्यम्

विरागप्रतानमेकखण्डकाव्यत्वेन कवी रचितवान् । 'अगतिकगतिकम्' इति खण्डकाव्यस्यास्य नामकरणमपि कृतं विद्यते । शताधिकत्रिपञ्चाशत्पद्यैः छन्दोबद्धैः पारम्परिकशैल्या खण्डकाव्यमिदं सम्पूर्णम् । भवदत्तो नाम ब्राह्मणोऽत्र नायकः । पूर्वं बभुक्षितः सन् क्षुधाप्रशमनाय कामपि गतिमलब्ध्वा श्मशाने चितावह्निना शंखालुकं पक्त्वा गतिं लभते । इति तावत् पूर्वरङ्गः । पश्चाच्च पुनः सांसारिकेषु आयामेषु यदात्मानं निर्मतिकं दुर्गतिकं वा अनुभवति तदा तपश्चरणमेव गतिरिति विविच्य चाङ्गीकरोति तपः । इति विरागप्रतानस्य भवति प्रतिपाद्यम् ।

४.२. वैशिष्ट्यम्

अगतिकगतिके खण्डकाव्ये पुरञ्जनोपाख्यानात् प्रेरणामात्रं गृहीतम् । प्रतीकयोजना तावद् भिद्यते । अत्र भवदत्तशर्मेतिनामा ब्राह्मणः कश्चिद् नायकत्वेन गृहीतो वर्तते। तत्र भवेन संसारेण दत्तः इति कृत्वा सांसारिकस्य पुरुषस्य तात्पर्यं प्रतीकार्थेन गृह्यते। तस्य वधू पाथेयरूपेण शंखालुकं दत्त्वा प्रस्थापयतीति स्वप्रेरणात्मकबुद्धिरूपेण गृह्यते। संसारचक्रमेव रात्रिं जन्ममरणचक्रं च कृत्वा

संसारमेव श्मशानभूमिः। तत्र जीवो जानन्नपि दोषान् सदोषाचरान् करोति। तथा हि भवदत्तशर्मा चितानलमशुद्धं जानन्नपि शंखालुकं पक्त्वा तत्रैव भुङ्क्ते विश्राम्यति च। ब्राह्मणो भुङ्क्त्वापि तेन नैका रात्रीः समुपोष्य व्यतीयापयितुं शक्यते स्म। इयं बुभुक्षा सांसारिकी भोगेच्छा वा यावद् न जहाति तावता का वार्ता संसारान्मोक्षस्येति ।

अत्र मिथ्याभूते जन्ममरणचक्रे पतितः प्राणी कर्तव्याकर्तव्यनिष्ठां कर्तुं नैव प्रभवति, दिग्भ्रान्त इवेति । अग्रे आह-

दिग्भ्रान्तिभिन्नधिषणस्य कुतोऽनुमानं
मर्त्यप्रचाररहिते क्व वचः प्रमाणम् ।
दाधावनं निशि कृशानुपिशाचकानां
प्रस्थानमाकुलपथं वितथं चकार ॥ (अगतिकगतिकम्, पृ. २१८)

अत एव कविना महाकालः स्तुतः । प्रायश्चित्तमेव कर्तुं चितां सिप्रातीरे वाञ्छति । तथा हि-

पौषेऽपि वर्षति हिमेऽपि सरित्तटेऽसौ
स्वेदावसेककलिलो मलिनोऽध्वधूलेः ।
उच्चावचावनिनिपात-परिक्षताङ्घ्रः
खिन्नोऽपि विश्लथतनुः पुनरुच्चचाल ॥ (अगतिकगतिकम्, पृ. २१७)

एतादृशो मानवस्तामेव संसारगतिमनुरुणद्धि । संसारं परित्यज्य प्रायश्चित्तमपि न जानीते । यथाऽसौ ब्राह्मणः चिताया एव उल्मुकं गृहीत्वा सिप्रातटे तृणादिकं प्रज्वाल्य स्नात्वा स्नात्वा सन्ध्योपासनादिकं करोतीति ।

इयं कथा कवेः स्वविषयिणी विद्यते । अत्र काव्ये प्रतीकयोजनया कविरात्मानं समुपस्थापयति । प्रतीकयोजना एवास्मिन् काव्ये प्रबन्धार्थं व्यञ्जयति । प्रबन्धगतामप्रस्तुतप्रशंसां पुरस्करोति। तथा च कविना यावज्जीवनं विश्वविद्यालये यापितं तत्र भक्षाभक्षणादि कृत्वा ब्राह्मणस्य क्षय एव कृत इति तादृशजीवनस्य श्मशानवासतुल्यत्वं यथा स्वतःस्फुरति तत्रत्या जीविका चिताग्निः पक्वशंखालुकतुल्यतां वहति । तादृशं जीवनं व्यतिगम्य यदा महाकालगमने वृत्तिं लभते तदा तस्य मनसि ग्लानिर्जायतेऽनुतापश्च भवति । अत एव गृहवासं विहाय वानप्रस्थप्रायेण जीवनेन यावान् उज्जयिन्यां वासः क्रियते

तावान् सिद्धवटभूमौ तपश्चर्यारूपेणैवेति सारांशः । इदं खण्डकाव्यं स्वजीवनं मनसि कृत्य कविना विरचितमिति कविरेव साक्षात्कारसमये मां कथयामास । नास्ति तत्र किमप्यन्यं प्रमाणम् इति ।

५. प्रकीर्णप्रतानः

अन्तिमश्च प्रकीर्णप्रतानः पञ्चमः । अस्मिन् प्रताने सप्तत्रिंशत्परिमितैः शीर्षकैर्विरचितानि पद्यानि कवेर्विविधप्रतिभापरिधौ भास्वद्रत्नभूतानीव परिदृश्यन्ते ।

५.१. प्रतिपाद्यम्

अन्तिमे प्रताने तु प्रतिपाद्यं प्रतिशीर्षकं भिद्यते, प्रकीर्णकत्वात्। प्रकीर्ण-रचनास्वपि ज्ञानकवेर्व्यञ्जनासरणी सर्वथा अन्योक्तिपरायणेति समुल्लसति। अन्योक्तिविधया प्रायेण कविः स्वात्मानमेवोपस्थापयति। **'का गतिः'** इत्यत्र स्फुटरचनाषट्कं मानवजीवनस्य विसंगतिं प्रकाशयति । यथा -

वीतंसे यो निपतति सकृत् तस्य काप्यायतिः स्याद्
व्याधो नेत्रे क्रथतु निभृतं पञ्जरे वा दधातु ।
सूत्रैराबध्य नटयतु वा मुञ्चतूत्कृत्य पक्षौ
शूलाकर्तुं पुटयतु न वा पक्षिणे को विशेषः ॥

(का गतिः, पृ २४९)

एष आशयः—यो जीवः कश्चित् कस्यापि वैरिणः क्रोडे निपतति तस्य मरणं वा मरणतुल्यजीवनं वा भवेत्, तस्य जीवस्य कृते नास्ति कोऽपि विषयः। अमुमाशयमधिकृत्य जालपतितं पक्षिणं चित्रयामास कविः ।

एवम्भूतमेवार्थं मनसिकृत्य **'भय'**शीर्षकेन रचना कृता विद्यते । तत्र पञ्चमपद्यं पूर्वोक्तया दिशैव सांसारिकं जीवनं प्रकाशयति । यथा -

गात्रे पुत्रकलत्रमित्रजटिले जागर्ति यावत् स्वता
लोलुप्या विपुला समीहितपथे यावत् प्रदाधावते ।
राग-द्वेष-समूढ-संचल-मतिर्यावच्च कूलंकषा
तावन्निर्भयता कुतोऽपि च कुतः शान्तं सुखं शाश्वतम् ॥

(भयम्, पृ. २८०)

अस्मिन्नेव वर्गे **'मरणं शरण'**मिति शीर्षकं समायाति । तत्र बहवः पुरुषा निरर्थकान् प्रश्नान् कृत्वा वृथैव प्रतारयन्ति । यथा -

किं किं कुत्र कुतः कथं किमभवत् कस्मात् कदा किं श्रुतं
भ्राता ते कियदर्जयत्यथ तवापत्यानि किं कुर्वते ।
इत्थं वीक्ष्य मुहुर्निर्गलकथानातिथ्यजोषाञ्जडान्
दोषज्ञा अपलापखिन्नमनसो मृत्युं वरं मन्वते ॥

(मरणं शरणम्, पृ. २८३)

अन्यासु प्रकीर्णरचनासु **'कविकुलगुरुवाणी'**ति कृत्वा शीर्षकत्रयं विद्यते। तत्रापि कालकृता विकृतयः खलु लोके प्रतिबिम्बिताः सुतरां चित्रिता दृश्यन्ते। अपि च प्रबन्धात्मिकासु अन्योक्तिषु **'दशार्णानां स्थाणुर्विजयते'**इतिशीर्षकं सुतरां विजयत एव ।

५.२. वैशिष्ट्यम्

अस्मिन् प्रकीर्णखण्डे समसामयिका विसङ्गतयश्चित्रिताः सन्ति। कवेर्मानसविडम्बना व्यञ्जनया व्यक्ता भवति। तत्र **'बुद्धिः स्वयंदूतिका'**इति रचना महत्त्वं भजते। स्वयंदूतिका स्त्री किल कमपि पुरुषं प्रति स्वस्य कृते दूतत्वं कृत्वा रमणं वाञ्छति। अस्यां रचनायां बुद्धिरेव स्वयंदूतिका या पुरुषं कुमार्गं प्रति प्रेरयति। तन्मतेन नास्ति कोऽपि निष्कलुष इति परिवादभयं न कर्तव्यमिति यथेच्छं च विहर्तव्यम्। तथा हि–

**गम्या काम्यवराङ्गना कुतुकिना यस्यां गमः शक्यते
या गन्तुं न समीहिता न कमना जायाप्यगम्येव सा ।
आरोहे तरणेः स्वतश्च तरणे येषामुरो दीर्यते
तेषामेव समन्ततो भयजुषां कुल्या समुद्रायते ॥**

(बुद्धिः स्वयंदूतिका, पृ० २७७)

अपि च नैसर्गिकचित्रेषु वसन्तवर्णना सुष्ठु विराजते। अस्यां विस्तृतायां रचनायामज्ञातयौवनानां मुग्धानां चित्रणं वैशिष्ट्यं वहति। यथा–

**कस्मान्नेत्रे तरलतरले विक्षिपेते कटाक्षान्
प्रायः पाणिश्चलति कुतुकादुत्तरीयाय कस्मात् ।
गात्रे कस्मात् पुलकमिलितो वेपथुर्नृतीति
व्यग्रं किंचित् स्फुरति हृदये ज्ञातुमिष्टे न बाला ॥**

(वसन्तः, पृ० २९२)

अनया रचनया कवेर्नायिकाभेदविषयकं प्राचुर्यं ज्ञानं प्रतीयते। विभातस्वागतमिति गीतिषु अनुस्वारविसर्गयोः प्रयोगो नास्तीति शैलीगता विशिष्टता द्रष्टव्या। वेत्रवत्याः सिप्रायाश्च नद्योर्वर्णनं नवीनसरणीं भजति। यत्र नदी मानुषीरूपेण चित्रिता मनो हरतीति।

६. उपसंहारः

अनेन कविना स्तोत्रकाव्यम्, वर्णनात्मक-खण्डकाव्यम्, अन्योक्तिपरकम्, गजलगीतिकाव्यम्.........इत्यादिविविधविधया काव्यं प्रणीतम्। तत्र समकालिकसमाजस्य राजनीतेश्च विसंगतिं विडम्बनां च भृशं समालोच्य काव्यं निर्मितम्। पारम्परिक-संस्कृत-काव्यधारा ज्ञानकवेर्लेखनीशैलीप्रवाहनिःसृतां नवीनां पद्धतिं प्राप्य समृद्धा जाता। विशेषतः अन्योक्तिपरकरचनाभिः अथवा प्रतीकात्मकैः खण्डकाव्यैरवस्थिना आधुनिक-संस्कृतसाहित्याय एका नवा विधा समर्पिता।

अत्रायं विशेषः। पृष्ठभूमिः वैदिकी।भावधारा दार्शनिकी। अद्वैते तादात्म्यम्। शैली पारम्परिकी।आधुनिकं च युगवृत्तम्। भावना विडम्बना। विसंगतिषु विक्षोभः। आग्रहो व्यङ्ग्यप्रतीतौ। चिन्तनं शाश्वतम्। भाषा प्रगल्भा। बिम्बविधानं नूतनम्। अभिधानं प्रतीकात्मकम् इति।

कलेवरदृशा प्रत्येकं प्रतानः स्वतन्त्रग्रन्थतुल्य इव प्रतिभाति। सर्वत्र भाषासु वैयाकरणवैदुष्यं भावेषु दार्शनिकीप्रवृत्तिश्च नितरां परिलक्ष्यत एव। ग्रन्थमेनमुररीकृत्य ज्ञानचरणाः साहित्याकादेम्या पुरस्कृताः। इत्थम् एकश्चन्द्रस्तमो हन्ति इति सुवचो चरितार्थयन्तीत्यलम्।

विंशशताब्दीये संस्कृतकाव्ये प्रतिबिम्बितं भारतम्

–डॉ० रमाकान्त शुक्लः
आर-६, वाणी विहारः, नयी दिल्ली-११००५९

विंश्या शताब्द्यां पुष्कलं संस्कृतकाव्यं विरचितमभूत्। तत्र काव्यस्य विविधानि रूपाणि एकतः संसारे विद्यमानं घट्यमानं च वस्तुतत्त्वं स्वस्वदृष्टिकोणेन वर्णयन्ति अपरतश्च काङ्क्ष्यमाणं वस्तु संकेतयन्ति व्यरच्यन्त। महाकाव्येषु, खण्डकाव्येषु, शतककाव्येषु, दीर्घकवितासु, मुक्तकेषु, प्रगीतेषु च भारतस्य वैविध्येन वैशद्येन च वर्णनमभूत्। भारतस्य भौगोलिक्याः प्राकृतिक्याः, सांस्कृतिक्याः, राजनीतिक्याः, सामाजिक्याः, आर्थिक्याश्च दशायाः वर्णनेन साकमत्रत्यायाः जनतायाः किञ्च निमिषे निमिषे घटितानां सरससरसानां विषमविषमानां च घटनानां वर्णनं विंशशताब्दीयसंस्कृतकाव्येषु गुणपरिमाणदृशा उल्लेखनीयतां भजति।

अस्मिंल्लेखे समयानुरोधात् स्थालीपुलाकन्यायेनैव '**विंशशताब्दीये संस्कृतकाव्ये प्रतिबिम्बितं भारत**'मिति विषयमवलम्ब्य काश्चन सूचना दीयन्ते। वैशद्येन लेखने तु महाग्रन्थोऽयं भवेत्।

विंशशताब्द्यां भारतस्य स्थितिरासीत् विचित्रैव विशिष्टैव। पारतन्त्र्यदुःखमनेन सोढम् स्वातन्त्र्यसुखञ्चावाप्तम्, स्वातन्त्र्यसुखमवाप्तं किन्तु गात्रभङ्ग कष्टमनुभूतम्, देहदारणव्यथया साकं जनानां परिवारोच्छेदो दृष्टः, अग्निदाहाः दृष्टाः, दृष्टश्च विविधक्षेत्रेषु विनाशो विकाशश्च; पुनश्च प्रतीक्षिता लब्धेऽपि स्वराज्ये सुराजस्यागमनवेला। दृष्टा देशस्य कृते सर्वस्वत्यागिनो जननायकाः दृष्टाश्च शासनासन्दिकारूढानां विश्रुताः भ्रष्टाचारपरम्पराः, दृष्टा वैज्ञानिकी उन्नतिः दृष्टञ्च देशात् प्रतिभानां पलायनम्, दृष्टमासूचेर्वायुयानोपग्रहपर्यन्तयन्त्राणां निर्माणक्षमत्वम् दृष्टञ्च दोषपूर्णसामग्र्या निर्मितानां सेतूनां धराशायित्वम्, दृष्टं स्वतन्त्रतावाप्त्यै समपूर्णभारतीयानां पर्युत्सुकत्वं कष्टसहिष्णुत्वं च दृष्टञ्च राजनीतिकदलानां परस्परवैरुद्ध्यं स्वेच्छाचारिता च, दृष्टं स्वभाषाप्रेम दृष्टश्च स्वभाषानिरादरः, दृष्टं संस्कृतसंस्कृत्योः स्तुतिगानं दृष्टञ्चोभयोरपि बहुधा

प्रत्याख्यानम्, दृष्टाः दावानल-वातिभूकम्पवात्याचक्रभीषणशोषादिका आपदो दृष्टाश्च तत्सहनोपायाः, ६१८ प्रभूतान्नोत्पादनं दृष्टा च प्राणापहारिणी क्षुधा, दृष्टाः विद्यालयानां विश्वविद्यालयानां संस्थानाञ्च ततयः दृष्टाश्च शून्याः कक्षाः, दृष्टानि नवनूतानि रेलयानानि दृष्टश्च अलब्धासनानां यात्रिणां महासम्मर्दः, दृष्टाः क्रान्तिकारिणः दृष्टाश्च देशघातकाः, दृष्टा विवेकानन्द-गान्धि-तिलक-पटेल-सुभाष-टैगोर-नेहरू-शास्त्रि-किदवई प्रभृतयो जननायका दृष्टाश्च अतर्क्यकर्माणः अवाच्यनामानः अपशकुनसदृशा नेतारः, दृष्टानि युद्धानि दृष्टं च विजयः, किं बहुना मधुरान्मधुरं कटुकात्कटुकं, सरसात्सरसं विषमाद्विषमं किं किं न दृष्टम्, श्रुतमनुभूतं वा?

अस्य सर्वस्यापि प्रतिफलनं संस्कृतस्य काव्येषु प्रभूततया जातम्। स्वातन्त्र्यपूर्वे काले विरचितेषु स्वातन्त्र्योत्तरं च रचितेषु शतशः सहस्रशश्च काव्येषु देशस्य स्वातन्त्र्यगाथा, राष्ट्रनायकानां, समाजोद्धारकाणां, क्रान्तिकारिणां हुतात्मनां, समरविजयिनां राष्ट्रार्पितजीवनानाञ्च वीरसैनिकानां, विद्याव्रतिनां विदुषां च चरितानि, कदाचित् समानान्तररूपेण कदाचिच्च पूर्वस्मृतिरूपेण विविधशैलीसु चित्रितानि। भारतभुवोऽपूर्वा सुषमा, गौरवं, दृश्यं श्रव्यं च रामणीयकं, भारतजनतायाः साहस-जिजीविषा-कर्मठता-सहिष्णुताप्रभृतयो विशेषा गुणाः सर्वमपि संस्कृत-काव्येषु साक्षात्कर्तुं शक्यते।

किञ्च-बलात्कारहत्यावधूदाहापहरणोत्कोचमाहार्घ्यापवञ्चनाऽतायि-तुष्टीकरणाद्यनपेक्षितप्रवृत्तिभ्यो मुक्तिरप्याकांक्षिता एषु काव्येषु।

काव्यानां यदि नामग्रहणमेव क्रियेत तर्हि बहु अवकाशोऽपेक्ष्येत। **'देववाणी- सुवास'**स्य द्वितीये खण्डे सप्तवर्षाणि पूर्वं डा० रहसबिहारीद्विवेदिना स्वतन्त्र्योत्तरं प्रणीतानां शताधिकमहाकाव्यानां सूची प्रदत्ता; तां विद्वांसो द्रष्टुमर्हन्ति। तत्र महाकाव्येषु द्रष्टव्यानि सन्ति-महात्मगान्धिचरितम् (स्वामिनो भगवदाचार्यस्य, १९४९), स्वातन्त्र्यविजयम् (पण्डिताक्षमारावमहाभागायाः), शिवराज्योदयम् (श्रीधर भास्कर वर्णेकरस्य १९७२), गान्धिचरितम् (साधुशरणमिश्रस्य, १९७२), स्वाधीनभारतम् (श्रीरामनिरीक्षण सिंहस्य), गान्धिविजयम् (लोकनाथशास्त्रिणः), स्वराज्यविजयम् (द्विजेन्द्रनाथशास्त्रिणः, १९७१), श्रीसुभाषचरितम् (छत्रे विश्वनाथ केशवस्य, १९६३), स्वातन्त्र्योदयम् (तस्यैव), रक्ताक्तहिमालयम् (परमेश्वरदत्त त्रिपाठिनः), भारतविजयम् (प्रभुदत्तशास्त्रिणः), श्रीतिलकयशोऽर्णवः (माधव

श्रीहरि अणे-कवे:, १९६६-७१), श्रीमालवीयकाव्यम् (रामकुबेरमालवीयस्य, १९६४), श्रीनेहरूचरितम् (ब्रह्मानन्दशुक्लस्य, १९६९), राजेन्द्रप्रसादाभ्युदयम् (श्रीपादकृष्णमूर्तिशास्त्रिण:,.१९६०), जवाहरवसन्तसाम्राज्यम् (जयरामशास्त्रिण:, १९५०), श्रीनेहरूयश:सौरभम् (गोस्वामिबलभद्रप्रसादशास्त्रिण:), गान्धिगौरवम् (शिवगोविन्दत्रिपाठिन:, १९६३), इन्दिराचरितम् (सत्यव्रतशास्त्रिण:, १९७४), भारतभूमिचरितम् (प्रभुदत्तस्वामिन:, १९६७); श्रीगान्धिचरितामृतम् (विद्यानिधि शास्त्रिण:), केरलोदय: (के०एन० एलुतच्छन कवे:, १९७७), जवाहरज्योतिर्महा-काव्यम् (रघुनाथप्रसादचतुर्वेदस्य), परमाणुभारतम् (शिवजीउपाध्यायस्य), 'सीता-चरितम्' 'स्वातन्त्र्यसंभवं' च (रेवाप्रसादद्विवेदसनातनस्य), लौहपुरुषावदानम् (शिवप्रसादभारद्वाजस्य, १९९०), भीष्मचरितम् (हरिनारायणदीक्षितस्य,१९९१), वैनायकम् (गजाननबालकृष्ण पलसुलमहोदयस्य, १९९८) च ।

शतककाव्येषु विभूतिवन्दनास्तोत्रम् (श्रीधरभास्करवर्णेकरस्य, १९४९), श्रीगान्धिचरितम् (ब्रह्मानन्द शुक्लस्य, १९५६), भारतशतकम् (महादेव-शास्त्रिण:), भारतशतकम् (रामकैलास पाण्डेयस्य, १९८४), भारतभूलहरी (श्रीधरभास्करवर्णेकरस्य), भाति मे भारतम् (डा० रमाकान्तशुक्लस्य, १९८०), जय भारतभूमे (डा० रमाकान्तशुक्लस्य, १९८१), भारतशतकम् ('अभिराज'राजेन्द्रमिश्रस्य, १९८४),गान्धिगौरवम् (रमेशचन्द्रशुक्लस्य, १९७९), इन्दिराविजय- वैजयन्ती (हजारीलालशास्त्रिण:, १९७६), इन्दिराकीर्तिशतकम् (श्रीकृष्ण सेमवालस्य), इन्दिरायशस्तिलकम् (रमेशचन्द्रशुक्लस्य, १९७६), इन्दिराशतकम् (रामकृपालुशास्त्रिण:), इन्दिराशतकम् (रामकृष्णशास्त्रिणो ऽव्ययस्य, १९८४), इन्दिराविरुदम् (विष्णुदत्तशर्मण:, १९८४) कूहा (उमाकान्तशुक्लस्य, १९८४), इंन्दिराप्रशस्तिशतकम् (शान्तिराठ्या:), देववाणीहुंकारशतकम् ('अभिराज'राजेन्द्र मिश्रस्य, १९८८), भारतीपरिदेवनम् (तस्यैव, १९९१), राजनीतिलीलाशताधिकम् (दीपकघोषस्य, १९९२-१९९३), वैशालीशतकम् ('अभिराज'राजेन्द्रमिश्रस्य, १९९३), मंगलं भारतम् (चन्दनलालपाराशरस्य, १९९१), पाकशासनशतकम् (तस्यैव, १९९९), **दूतकाव्येषु** भारतसन्देश: (शिवप्रसादभारद्वाजस्य), रेडियोदूतम् (परमानन्दचतुर्वेदस्य) कामदूतम् (हरिशरणशाण्डिल्यस्य), गन्धदूतम् (परमानन्द शास्त्रिण:), मित्रदूतं दूतप्रतिवचनं च (इच्छारामद्विवेदस्य), मृगांकदूतम् ('अभिराज'राजेन्द्रमिश्रस्य), परिगणयितुं शक्यन्ते।

अन्येषु च काव्येषु क्षमारावकृता सत्याग्रहगीता, उत्तरसत्याग्रहगीता, पं० सत्यदेववासिष्ठस्य 'सत्याग्रहनीतिकाव्यम्' (१९३९-१९५६), नवभारतपुराणम् (आचार्यरमेशचन्द्रशुक्लस्य, १९८६), बंगलादेशः (तस्यैव, १९७२), राजीवसौरभम् (शिववरणशुक्लस्य, १९८६), भूवैभवम् (आचार्यरमेशचन्द्रशुक्लस्य, १९८६), भारतदर्शनम् (कृष्णदत्तशर्मशास्त्रिणः, १९८६), अनुभूतिः (प्रवेशसक्सेनायाः, १९९६), राष्ट्रसूक्तं (गिरिजाशंकरमिश्रस्य, १९९६), इत्येतदादीनि परिगणयितुं शक्यन्ते।

स्फुटकवितासु भारतसुषमा (ब्रह्मानन्दशुक्लस्य, १९४८), अर्वाचीन-संस्कृतनाम्नि त्रैमासिकपत्रे प्रकाशिता रचनाः यथा–भूतले भाति मेऽनारतम् भारतम् (रमाकान्तशुक्लस्य संक्षेपः, १९८०), भारतवन्दनम् (वासुदेवकृष्णचतुर्वेदस्य, १९८०), राजधान्याः सुषमावर्णनम् (जगदीश-दत्तदीक्षितस्य, १९८०), आचाररूपकम् (रघुनाथप्रसादचतुर्वेदस्य) भारते भासतां भारती संस्कृतिः (वनेश्वरपाठकस्य, १९८२), भाति मे भारती भारते ऽनारतम् (वेदानन्दझामहाभागस्य), लोकमान्य तिलकः (शिवदत्तचतुर्वेदस्य, १९८३), राजस्थानम् (रमाकान्तशुक्लस्य, १९८३), राजते राजनीतिः (शिवदत्तचतुर्वेदस्य, १९८३), धन्या धरा ममेयम् (तस्यैव, १९८३), समयप्रवाहः (तस्यैव, १९८३), अहं स्वतन्त्रता भणामि (रमाकान्तशुक्लस्य, १९८३), श्रीबदरीशतरंगिणी, सुरश्मिकाश्मीरं (श्री०सुन्दरराजस्य), कामयेऽहम् (कृष्णकान्तशुक्लस्य, १९८४), उज्जयिनीयं जयति (रमाकान्तशुक्लस्य, १९८४), हरियाणासंस्कृतसाहित्यसौरभम् (रामेश्वरदत्तशास्त्रिणः, १९८४), इन्दिरागीतिः (श्री०सुन्दरराजस्य, १९८५), धातस्त्वया किं कृतम् (उमारमणझा- महाभागस्य, १९८५), हन्तेन्दिरार्या सहसा प्रयाता (हरिश्चन्द्र रेणापुरकरस्य, १९८५), महाप्रयाणम् (श्रीकृष्ण-सेमवालस्य, १९८५), देवीन्दिराऽन्तर्हिता (रेवाप्रसाद द्विवेदिनः, १९८५), रक्ष तं भारतम् (श्रीनिवासरथस्य, १९८६), भारतं भजामः (अरविन्दनाभशुक्लस्य, १९८६), राष्ट्रदेवते (रमाकान्तशुक्लस्य, १९८६), इह तमसां राज्ये (रस्तोगी लीनायाः, १९८६), देशरक्षा कथम् (विष्णुकान्तशुक्लस्य, १९८६), भारतजनताहम् (रमाकान्तशुक्लस्य, १९८६), कीदृशी स्वतन्त्रता ('अभिराज'राजेन्द्रमिश्रस्य, १९८६), आतंकवादः पुनरुग्रवादः– द्वावेव संसारविनाशकौ तौ (रामेश्वरदत्तशास्त्रिणः, १९८७), रौति ते भारतम् (रमाकान्तशुक्लस्य, १९८७), मिहिरावलीं दृष्ट्वा ('अभिराज'राजेन्द्रमिश्रस्य, १९८७), रामगिरिपरिसरः

(प्रकाशपाण्डेमहाभागस्य, १९८७), मामका भारतीयाः क्षणं श्रूयताम् (राजदेवमिश्रस्य, १९८७), भारतीयः स एवात्र संकीर्त्यते (शम्भुनाथाचार्यस्य, १९८७), श्रीवैष्णवीदेवीयात्रावर्णनम् (झा उमारमणस्य, १९८७), मेघप्रबोधनम् (रमाकान्तशुक्लस्य, १९८७), शोषः पोषश्च (अमीरचन्द- शास्त्रिणः, १९८७), अकालजलद (रमाकान्तशुक्लस्य, १९८८), ज्वलति हन्त ! पञ्चापप्रदेशस्यः (परमानन्दशास्त्रिणः, १९८८), भारत-वन्दना (ओमप्रकाशठाकुरस्य, १९८८), भारतम् (रामकैलासपाण्डेयस्य, १९८८), उज्जयिनी (हरिहरत्रिवेदिनः, १९८८), उज्जयिनीमुपसर (सुधाकराचार्यत्रिपाठिनः, १९८८), स्वागतं पयोद ते (रमाकान्तशुक्लस्य, १९८८), भाव्यं शुभं भावि हि भारतस्य (श्री०सुन्दरराजस्य, १९८९), नेहरुं तं स्मरामः (रमाकान्तशुक्लस्यं, १९८९), राष्ट्रैक्यगीतम् (नलिनीशुक्लायाः, १९८९), एकं सद्बहुधा विलोक्यते भारतम् (रमाकान्तशुक्लस्य, १९८९), अद्यत्वे (विष्णुकान्तशुक्लस्य, १९८९), उत्तरमंगलम् (रमाकान्तशुक्लस्य, १९९०), भारतं नाम विश्रुतम् (श्री०सुन्दरराजस्य, १९९०), निर्वाचनावसरे (खिस्तेबटुकनाथशास्त्रिणः, १९९०), निर्वाचनात्प्राक् (भास्कराचार्यत्रिपाठिनः, १९९०), जाबालिपुरं चल (रमाकान्तशुक्लस्य, १९९०), यतो यतोऽपि गम्यते (भगवतीलाल राजपुरोहितस्य, १९९०), श्रीलाललालित्यम् (बटोहीझामहाभागस्य, १९९०), वदत नेतारो मनाक् (रमाकान्तशुक्लस्य, १९९०), नेतृकथा (भगवतीलालराजपुरोहितस्यः, १९९०), नेतृशतनामावलिः (इच्छाराम द्विवेदिनः, १९९०), व्रजदर्शनम् (बटोहीझामहाभागस्य), संस्कृतज्ञा मृताः सन्ति न मृतं संस्कृतं तथा (रामेश्वरदत्तशास्त्रिणः, १९९०), उत्कोचाष्टकम् (दादूरामशर्मणः, १९९१), पश्य बन्धो क्षणम् (इच्छारामद्विवेदिनः, १९९१), भारतेऽनारतं किं नु बोभूयते (रामप्रकाशवर्णिनः, १९९१), संगच्छध्वं संगच्छध्वं (ओम्प्रकाशठाकुरस्य, १९९१), ब्रूहि जगन्नाथस्वामिन् (रमाकान्तशुक्लस्य, १९९१), अशनिपातः (कृष्णकान्तशुक्लस्य, १९९१), राजीवहत्या (प्रकाशपाण्डे-महाभागस्य, १९९१), कालिदासमहोत्सवम् ('अभिराज'राजेन्द्रमिश्रस्य, १९९२), कथञ्चिदस्तु भारते स्वतन्त्रता सुरक्षिता (श्री०सुन्दरराजस्य, १९९२), वन्दनीयास्ते (रमाकान्तशुक्लस्य, १९९३), भारतं भारतीयात्मनां भारतम् (वनेश्वरपाठकस्य, १९९३), रामनाम्नि मारणं कथं जनप्रतारणम् (श्री०सुन्दरराजस्य, १९८९), भारतं रे (जनार्दनप्रसादपाण्डेय 'मणेः', १९९३), देशगीतिका (हरेकृष्णमेहेरस्य, १९९३), मदीयकविते कुरुष्व गानम् (रमाकान्तशुक्लस्य, १९९४), हजरतबल-

प्रकरणम् (हरिश्चन्द्ररेणापुरकस्य, १९९४), वर्णभेदावसादः (तस्यैव, १९९४), समारब्धम् (इच्छारामद्विवेदिनः, १९९४), प्रेक्ष्यताम् (भास्कराचार्यत्रिपाठिनः, १९९५), वयं सेवामहै राष्ट्रम् (अभिनवशुक्लस्य, १९९५), भागीरथीदर्शनम् (गोस्वामिबलभद्रप्रसादशास्त्रिणः, १९९५), शिरो धुनोति भारतम् (अभिनवशुक्लस्य, १९९५), विरौत्येष देशः (जनार्दनप्रसादपाण्डेयमणेः, १९९५), भारतं नमाम्यहं (तस्यैव, १९९५), स्वीयराष्ट्रं दृश्यताम् (तस्यैव, १९९५), राष्ट्रभक्ताः प्ररक्षत (तस्यैव, १९९५), वेपते भारतम् (तस्यैव, १९९५), मम राष्ट्रमिदं जगदाभरणम् (तस्यैव, १९९५), राष्ट्रसंवेदना (तस्यैव, १९९५), देशवर्णनम् (देवनारायणझा महाभागस्य, १९९७), वन्द्यतां कापि सा शासनासन्दिका (रमाकान्तशुक्लस्य, १९९७), स्वतन्त्रतायाः स्वर्णजयन्ती (तस्यैव, १९९८), भारतीयस्वतन्त्रतायाः स्वर्णमहोत्सवे चिन्तनम् (रामचन्द्रअरलीकट्टिनः, १९९८), जय त्रिवर्णध्वज (श्री०सुन्दरराजस्य, १९९८), विभाति भारती धरा (व्योमशेखरस्य, १९९८), दुर्नीतिगत्यष्टकम् (तन्मयकुमारभट्टाचार्यस्य, १९९८), धनार्जनशताब्दी (शिवशरणशर्मणः, १९९८), षड्विंशजानुआरी (गोकुलेन्द्रनारायणदेवः, १९९८), लोकतन्त्रेऽस्मिन् (रमाकान्तशुक्लस्य, १९९८), प्रणम्याः कारगिलवीराः (तस्यैव, १९९९), कारगिलसंग्रामः (हरिश्चन्द्ररेणापुरकरस्य, १९९९), भारतस्य विजयोऽयम् (रमाकान्तशुक्लस्य, १९९९), विश्ववन्द्यं मनोज्ञं सदा भारतम् (श्रीकान्त 'कुशलस्य', १९९९), कुत्र गच्छति देशोऽयम् (रामकृष्ण सराफस्य, १९९९), भारतमाता विजयतेतराम् (वासुदेव वि० पाठकस्य, १९९९), योऽयं कृतः शपथस्त्वया (रमाकान्तशुक्लस्य, १९९९), भारतीयशासनं विजयताम् ('अभिराज'राजेन्द्रमिश्रस्य, १९९९), संभ्रान्ताः किममी जनाः (प्रभातकुमारशर्मणः, १९९९), भावसन्धिः (रमाकान्तशुक्लस्य, २०००), भयानकं यद्भुवनेश्वरेऽभूत् (श्री०सुन्दरराजस्य, २०००), अहो दौर्भाग्यमुत्कलानाम् (हरिश्चन्द्ररेणापुरकरस्य, २०००), कलिंगप्रकम्पनः (झा-शशिनाथस्य, २०००), कारगिलविजयः (तस्यैव, २०००), कार्गिलम् (रविन्द्रपण्डामहाभागस्य, २०००), अनीतिनीतेर्जननीतिरीतिः (श्रीसुन्दरराजस्य, २०००), राष्ट्रपतिक्लिण्टनस्य भारतयात्रा (हरिश्चन्द्ररेणापुरकरस्य, २०००), हिमाचलयात्रा शिमला च (त्रिपाठिभास्कराचार्यस्य, २०००), मम भारतम् (मनुलता शर्मणः, २०००), भरतभूमिरतुला (कामताप्रसाद-त्रिपाठिपीयूषस्य, २०००) वर्णैकरश्रद्धाञ्जलिः (अभिराज राजेन्द्रमिश्रस्य, २०००), पाकिस्तास्योग्रवादस्य पराकाष्ठा (हरिश्चन्द्ररेणापुरकरस्य, २०००),

श्रीवाजपेयिनाममेरिकायात्रा (तस्यैव, २०००), इत्याद्याः परिगणयितुं शक्यन्ते।

अन्यासु तासु तास्वपि पत्रिकासु–पारिजातम्, विश्वसंस्कृतम्, दूर्वा इत्याद्यासु नैका रचनाः प्रकाशिताः सन्ति यत्र भारतस्य बाह्यमान्तरिकञ्च, दृष्टं काम्यञ्च स्वरूपं प्रतिफलितं विद्यते। २००० तमे खैष्टेऽब्दे दिल्ली संस्कृत अकादम्या 'स्वातन्त्र्यस्वर्णसौरभम्' नाम गद्यपद्यात्मकं संकलनं प्रकाशितमस्ति यत्र शताधिकासु रचनासु भारतस्य प्रतिच्छविश्चित्र्यते।

प्रेयांसो विद्वांसः, विंशशताब्दिकं संस्कृतसाहित्यमस्ति गुणपरिमाणदृशा पुष्कलम्। तस्य संकलनस्य, प्रकाशनस्य, सूचीकरणस्य, समीक्षणस्य, पाठनस्य, संशोधनस्य नूनमस्ति प्रासङ्गिकता यदि वयं संस्कृतं पुरातनात्पुरातनं नूतनान्नूतनं च संज्ञापयितुमिच्छामः।

(रमाकान्त शुक्लः)

विज्ञानभवनम्,

नयी दिल्ली–१

७.४.२००१

देववाणी-परिषद्वार्ता

संस्कृत-काव्य-परिसंवादः

देववाणी-परिषदो दिल्लीसंस्कृतअकादम्याश्च संयुक्ततत्त्वावधाने १४.७.२००१ तारिकायां नवदिल्ल्यां वाणी विहारे 'वाणी पब्लिक स्कूल'इत्यत्र 'संस्कृत-काव्य-परिसंवादः' समायोज्यत।

मुख्यातिथिना क्षेत्रीयविधायकेन श्रीमुकेशशर्मणा किञ्च समारोहाध्यक्षेण अथ च दिल्ली संस्कृतअकादम्या उपाध्यक्षेण श्री कुलानन्दभारतीयेनास्मिन्नवसरे 'अर्वाचीनसंस्कृत'स्य त्रयोविंशवर्षीयस्य प्रथमाङ्कस्य द्वितीयाङ्कस्य च क्रमश औपचारिकं लोकार्पणं कृतम्।

अकादमीसचिवेन 'कविरत्न'श्रीकृष्णसेमवालेन प्रवर्तनभाषणं कृतम्। डा० मधुसूदनमिश्र-डॉ० संघसेनसिंह-डॉ० नोदनाथमिश्र-डॉ० कृष्णलाल-कविरत्न' ओम्प्रकाशठाकुर-डॉ० प्रवेश सक्सेना-शशिपालशर्मभिः भूमिकापुरस्सरं स्व कविताः श्राविताः। सहृदयश्रोतॄणां पक्षतः 'दिल्ली इंग्लिश अकेडमी' निदेशकेन डा० राजमहाभागेन स्वविचाराः प्रस्तुताः। परिसंवादस्य सञ्चालनं देववाणी-परिषन्महासचिवेन डॉ० रमाकान्तशुक्लेन कृतम्। अस्मिन्नवसरे अर्वाचीनसंस्कृतस्य अक्षरयोजनार्थं श्रीचन्द्रभानशर्मणः सम्मानोऽप्यक्रियत। विशिष्टातिथिना श्रीकृष्णदत्तशास्त्रिणा तस्मै माल्यं समर्पितम्। वाणी पब्लिक स्कूल-प्रबन्धकेन श्री पी०एस० सिंघलेनातिथीनां स्वागतं कृतम्।

देववाणी परिषदः कार्यकारिणी

१५.७.२००१ तारिकायाम् 'आर ६ वाणी विहार, नयी दिल्ली-११००५९' इत्यत्र देववाणी-परिषदः कार्यकारिण्याः, निर्वाचनमण्डलस्य साधारण-सभायाश्चोपवेशनेषु परिषदः कार्यकारिण्याः सर्वसम्मत्या निर्वाचनमित्थं पुष्टिमभजत्-

अध्यक्षः डॉ० उमाकान्त शुक्लः, **उपाध्यक्षः** श्रीमती रमा शुक्ला, **महासचिवः** डॉ० रमाकान्त शुक्लः, **सहसचिवः** डॉ० इच्छाराम द्विवेदी **कोषाध्यक्षः** प्रो० वेदप्रकाश गौतमः, **सदस्याः**-डॉ० रवीन्द्र नागरः, डॉ० चन्द्रमौलि शुक्लः, श्री आनन्दवर्धन शुक्लः, श्री अभिनव शुक्लः, डॉ०(श्रीमती) सरोज व्यासः, श्रीमती अनीता शुक्ला च। (अभिनवः शुक्लः)

संस्कृतजगद्वार्ता

(१) दिल्ली संस्कृत अकादम्या आयोजनानि

अकादम्या अग्रलिखितानि आयोजनाति कोष्ठयाङ्कितेषु दिनाङ्केषु कृतानि–

१. संस्कृतकाव्यसंगोष्ठी : भारतसंकृतपरिषदः सौजन्येन (१७.६.२००१)

२. कवेः साक्षात्कारः यत्र डॉ० सत्यव्रतशास्त्रिणा स्वकाव्ययात्रायाः परिचयेन साकं श्रोतॄणां प्रश्नाः समुत्तरिताः (२७.६.२००१)

३. पाठ्यक्रमे संस्कृतस्य स्थितिमवलम्ब्य विचारगोष्ठी (२९.६.२००१)

४. व्यासजयन्त्युपलक्ष्ये 'पुराणेषु विज्ञानम्' इति विषयमवलम्ब्य संगोष्ठी (७.७.२००१)

५. संस्कृतकाव्य परिसंवादः–देववाणी परिषदः सौजन्येन (१४.७.२००१)

६. **'वर्तमाने भगवतो महावीरस्य सिद्धान्तानां प्रासङ्गिकता'** मवलम्ब्य **परिचर्चा**–राणाप्रतापबागस्थमहावीर उच्चतरमाडलविद्यालयस्य सौजन्येन (२१.७.२००१)

७. संस्कृतदिवससमारोहः (३.८.२००१)

८. स्वातन्त्र्यदिवसमुपलक्ष्य अखिलभारतीयसंस्कृतकविसम्मेलनम् (११.८.२००१) यत्र डा० इच्छारामद्विवेदी 'प्रणवः', डॉ० रमाकान्त शुक्लः, डॉ० चन्द्रभूषण झा, श्रीकान्त मिश्रः 'कुशलः' परमानन्द झा, वीरेन्दकुमार झा, डा० प्रीतमचन्द्र शास्त्री, कविरत्न श्रीकृष्णसेमवालः, डॉ० रमेशकुमार पाण्डेयः अन्ये चानेके कवयः कवितापाठमकुर्वन् ।

(२) आचार्यरामनाथसुमनमहाभागाय अभिनन्दनग्रन्थस्य समर्पणम्

१.७.२००१ तारिकायां पिलखुआ (उ०प्र०) नगरे आचार्यरामनाथ सुमन महोदयाभिनन्दनसमित्या समायोजिते भव्ये समारोहे आचार्यसुमनमहाभागाय **'अभिनन्दनग्रन्थः'** समर्पितोऽभूत्। अस्मिन्नवसरे समुपस्थितैरनेकैर्विद्वद्भिः आचार्यमहाभागस्य संस्कृतसेवा उपश्लोकिता।

(३) राष्ट्रपतिसम्मानिताः संस्कृतविद्वांसः

स्वातन्त्र्यपर्वणि भारतस्य महामहिमराष्ट्रपतिना एते संस्कृतविद्वांसः सम्मानिताः सन्ति–

१. श्रीपाद लक्ष्मीनारायण शास्त्री, २. डा अशोक कुमार गोस्वामी, ३. प्रो० वाचस्पति उपाध्यायः, ४. मणिलाल नारायण कन्सारा, ५. डा० दयानन्द नरसिंह शानभागः, ६.श्री के० नारायण भट्ट, ७. डा० एन० पी उन्नि, ८. श्री गणेश हरि तर्लेकरः, ९. पं० गोपाल नारायण बहुरा, १०. श्री गणपति श्रीनिवास देशिकाचारियर्, ११. श्री वासुदेव श्रीवत्सांकाचारियर्. १२. पं० सीताराम कविराजः, १३. प्रो० सुरेशचन्द्र पाण्डेयः, १४. पं० वायुनन्दन पाण्डेयः, १५. डा० सीतानाथ गोस्वामी, १६. प्रो० मौ० इसराइल खानः।

(अभिनवः शुक्लः)



'दिल्ली संस्कृत अकादमी'–'देववाणी-परिषद्, दिल्ली' संस्थयोः संयुक्ततत्त्वावधाने आयोजिते 'संस्कृतकाव्यपरिसंवादे' (उपरि वामतो दक्षिणं) परिषन्महासचिवः डॉ० रमाकान्त शुक्लः, अकादमीसचिवः डॉ० श्रीकृष्णसेमवालः, विशिष्टातिथिः श्री कृष्णदत्त शास्त्री, मुख्यातिथिः श्री मुकेश शर्मा विधायकः, समारोहाध्यक्षः श्रीकुलानन्दभारतीयः (भाषमाणः), डॉ० मधुसूदन मिश्रः, डॉ० संघसेन सिंहः, विशिष्टातिथिः आचार्यनरेन्द्रनाथपाण्डेयश्च।

(नीचैः) विशिष्टातिथिः श्रीकृष्णदत्त शास्त्री अर्वाचीनसंस्कृतस्याक्षरयोजकं पं० चन्द्रभानशर्माणं माल्यार्पणेनाभिनन्दयति। (१४.७.२००१)

दिल्ली संस्कृत अकादमी, दिल्ली सरकार

पूर्व भारती महिला महाविद्यालय भवन

प्लाट नं० ५, झण्डेवालान, करोलबाग, नई दिल्ली-११००१५

"अखिल भारतीय मौलिक संस्कृत साहित्य रचना पुरस्कार योजना

(२००१-२००२)

भारतवर्ष के संस्कृत भाषा के कवियों, लेखकों, नाटककारों, कहानीकारों तथा बाल साहित्य लेखकोंसे वर्ष २००१-२००२ के लिये "अखिल भारतीय मौलिक संस्कृत साहित्य रचना पुरस्कार योजना" के अन्तर्गत संस्कृत भाषा की मौलिक तथा अपुरस्कृत पुस्तकें आमन्त्रित की जाती हैं। पुरस्कारों का विवरण निम्नानुसार है :-

क्र.सं.	पुरस्कार का नाम	संख्या	राशि (रु०)
१.	पण्डितराज जगन्नाथ संस्कृत पद्य रचना पुरस्कार	१	७०००
२.	पण्डित चारुदेव शास्त्री संस्कृत गद्य रचना पुरस्कार	१	७०००
३.	डा० आदित्यनाथ झा संस्कृत नाट्य रचना पुरस्कार	१	७०००
४.	पण्डित दीनानाथ शास्त्री संस्कृत समालोचनात्मक साहित्य रचना पुरस्कार	१	७०००
५.	अब्दुलरहीम खानखाना विविध संस्कृत समालोचनात्मक साहित्य रचना पुरस्कार	१	७०००
६.	डा गोस्वामी गिरधारीलाल शास्त्री संस्कृत कथा साहित्य रचना पुरस्कार	१	७०००
७.	पण्डित परमेश्वरानन्द बाल संस्कृत साहित्य रचना पुरस्कार	१	७०००
८.	पण्डित इन्द्रचन्द्रशास्त्री दर्शन साहित्य रचना पुरस्कार	१	७०००
९.	वैद्य भुवनचन्द्रजोशी संस्कृत आयुर्वेद साहित्य रचना पुरस्कार	१	७०००

इसके अतिरिक्त उपर्युक्त प्रत्येक संस्कृत विद्वान् के नाम पर रु० ३००० प्रति के प्रोत्साहन पुरस्कार होंगे।

(१) सभी रचनाओं का प्रकाशन वर्ष १९९८ से २००० की अवधि का ही मान्य होगा।

(२) आवेदन पत्र का फार्म तथा विस्तृत नियम अकादमी कार्यालय से प्रत्येक कार्यदिवस (शनिवार और रविवार को छोड़कर) पर प्रातः १०.०० से सायं ५.०० बजे के बीच दिनांक १८.८.२००१ तक प्राप्त किये जा सकते हैं अथवा डाक द्वारा भी मंगाये जा सकते हैं। आवेदन पत्र प्रस्तुत करने की अन्तिम तिथि ३१.८.२००२ है।

(३) एम०फिल०, पीएच०डी० आदि एवं तत्समकक्ष उपाधियों के लिये प्रस्तुत शोध ग्रन्थ मान्य नहीं होंगे।

(४) केवल विविध समालोचनात्मक रचनाओं की भाषा संस्कृत के अतिरिक्त हिन्दी भी हो सकती है। (केवल क्रम संख्या ५ के पुरस्कार हेतु)।

(श्रीकृष्ण सेमवाल)
सचिव

परामर्शदातृ–मण्डलम्

१. आचार्य श्रीनिवास रथ:
२. "अभिराज" डा० राजेन्द्र मिश्र:
३. डा० उमाकान्त शुक्ल:
४. डा० विष्णुकान्त शुक्ल:
५. डा० भास्कराचार्य त्रिपाठी
६. डा० इच्छाराम द्विवेदी "प्रणव:"

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००.०० प्रतिपृष्ठम्
इतरपृष्ठस्य	१०००.०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००.००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम् (२००१त: प्रभावि)

संस्थानां कृते	वार्षिकं (भारते) रु० १००.००
	वार्षिकं (विदेशेषु) यू०एस० डालरा: १५
	आजीवनं (भारते) रु० ८००.००
	आजीवनं (विदेशेषु) यू०एस० डालरा: १५०
व्यक्तीनां कृते	वार्षिकं (भारते) रु० ५०.००
	वार्षिकं (विदेशेषु) यू एस० डालरा: १५
	आजीवनं (भारते) रु० ५००.००
	आजीवनं (विदेशेषु) यू०एस० डालरा: १५०

डाकव्यय: यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीनसंस्कृतस्य सर्वेऽप्यंका: प्रेष्येरन्,

भारते	रु० ८०.००
विदेशेषु	यू०एस० डालरा: ४०

विगतांकानां (Back Volumes) प्रतिवर्षम् मूल्यम् रु० १००/– २० डालरा वा/

देववाणी–परिषद: सदस्यानां सभासदां च कृते पत्रं नि:शुल्कं प्रेष्यते । किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देय: स्यात् । ग्राहका: ग्राहकशुल्कम् 'अर्वाचीनसंस्कृतम् (Arvacheenasanskritam) इत्यंकितेन दिल्ल्यां/नवदिल्ल्यां प्रदेयेन बैंकड्राफ्टेन/धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :–

सम्पादक:
अर्वाचीनसंस्कृतम्
देववाणी–परिषद्, दिल्ली
आर–६, वाणी–विहार:, नयी दिल्ली–११००५९ (भारतम्)

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

ग्रन्थांकः	ग्रन्थः लेखकः	मूल्यम्
23.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० 150.00
28.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० 150.00
29.	साहित्यकौतुकम् (पं० टी०वी० परमेश्वर अय्यरः)	रु० 150.00
32.	श्रीबदरीशसुप्रभातम् (डा० सी०आर स्वामिनाथन्)	रु० 10.00
42.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० 10.00
44.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० 150.00
45.	संस्कृत साहित्य में राष्ट्रिय भावना (डा०हरिनारायण दीक्षित)	रु० 400.00
47.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० 10.00
49.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० 60.00
53.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्र 'विनयः')	रु० 60.00
59.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्री त्रिगुणानन्द शुक्ल)	रु० 150.00
64.	लक्ष्मीशतकम् (डा० वरदाचार्य कण्णन्)	रु० 60.00
65.	ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० 60.00
72.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० 150.00
74.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु० 60.00
75.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० 110.00
81.	नाट्यसप्तकम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० 200.00
82.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० 30.00
83.	श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी (श्री श्री०सुन्दरराजः)	रु० 10.00
84.	भारतजनताहम् (कवितासंग्रहः यन्त्रस्थः)(डा० रमाकान्तशुक्लः)	रु० 200.00
85.	सत्प्रेरणानाटकम् (डा० इच्छाराम द्विवेदी 'प्रणवः')	रु० 100.00
86.	निस्यन्दिनी(संस्कृतगीतसंग्रहः)(डा० जनार्दनप्रसाद पाण्डेय'मणिः')	रु० 100.00
87.	श्रीजगन्नाथसुप्रभातम् तथा अन्यानि स्तोत्राणि (श्री० सुन्दरराजः)	रु० 50.00
88.	कवितावलिः(अनुवादकाव्यम्)(डा० प्रेमनारायण द्विवेदी)	रु० 100.00

देववाणी-परिषद्, दिल्ली आर-6 वाणी विहारः, नई दिल्ली-110059 फोन : 5639146

''देववाणी-परिषद्, दिल्ली''-कृते डा० रमाकान्तशुक्लेन ''प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली-११००५९ फोन : ५६४०३२४'' इति मुद्रणालये मुद्रापयित्वा ''आर-६, वाणी विहारः, नई दिल्ली-११००५९'' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (२३/३) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-८-२००१ अस्यांकस्य मूल्यम् रु० २५-०० Rs. 25.00